दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणशुक्लपूर्णिमा
भाद्रपद 12 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-12 ■ वर्ष-5 ■ अङ्क-309 | 1 | अगस्त 28, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 पलाण्डोः उपलब्धतां सुनिश्चितीकर्तुं सर्वकारेण 'बफर-स्टॉक' इत्यस्मात् पलाण्डु-विक्रयणम् आरब्धम्

4 अधुना गोपनीया भविष्यति महिला-उत्पीडनस्य परिवादः, सर्वकारः रचयिष्यति नूतनान् नियमान्

8 कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालये भारतीय- ज्ञान- परम्पराधारित- लेखन- परियोजनायाः लेखकानां सम्मेलनं सम्पन्नम्

## अद्यतनीयं सुभाषितम्

**आत्मानं सर्वथा रक्षेद्राज्ञा रक्षेच्च मेदिनी।**
**आत्ममूलमिदं सर्वं आहुर्हि विदुषो जनाः।।**

भावार्थः- मनुष्य को हर प्रकार से स्वयं की रक्षा करनी चाहिए तथा राजा को भी इसी प्रकार स्वदेश की रक्षा करनी चाहिए, क्योंकि विद्वानों का यही कहना है कि सचमुच ही सभी प्राणी अपनी रक्षा के प्रति सदैव सजग होते हैं।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.आमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

# प्रधानमन्त्रिणा मोदिना दृश्य-श्रव्य-माध्यमेन खेलो इण्डिया संवादः सम्बोधितः




प्रधानमन्त्री नरेन्द्रमोदी प्रावोचत् यत् सर्वकारः भारतस्य कृते आधुनिक-क्रीडा-पारिस्थितिक्याः निर्माणाय पूर्णतया कटिबद्धो वर्तते। सः अकथयत् यत् क्रीडा-विश्वविद्यालयेभ्यः आरभ्य आधुनिक-प्रशिक्षण-केन्द्राणि यावत् समग्रदेशे एतादृशं वातावरणं निर्मीयते, यत्र प्रतिभायै प्रत्येकस्मिन् चरणे साहाय्यं प्रोत्साहनं च लभेत । दृश्य-श्रव्य-परान्तर्जालीय-माध्यमेन खेलो इण्डिया संवादं सम्बोधयन् श्रीमोदी अवदत् यत् क्रीडा केवलं पदकावाप्ति-पर्यन्तं सीमिता नास्ति, अपि तु विकसित-भारतस्य निर्माणे भारतस्य क्रीडा-सामर्थ्य युवशक्तिं च सङ्घटयितुम् एकं महत् राष्ट्रियाभियानम् अस्ति। प्रधानमन्त्रिणा प्रतिपादितं यत् वैश्विक-क्रीडा-पटले स्व-प्रतिभां प्रकाशयितुं देशस्य प्रत्येकस्मिन् जनपदे सामर्थ्यं विद्यते। सः असूचयत् यत् क्रीडाक्षेत्रे पञ्चभ्यः पञ्चदश वर्षपर्यन्तं वयस्कानां बालकानां चिह्नीकरणाय रक्त-दुर्गस्य प्राचीरात् एका महती प्रतिभा-अन्वेषण-योजना उद्घोषिता । प्रधानमन्त्री प्रसन्नतां प्रकटयन् न्यगादीत् यत् अद्य भारते क्रीडा उत्कृष्टाजीविकात्वेन अथ च व्यवसाय-रूपेण समुदेति। अत्रावसरे केन्द्रीय-युवप्रकरण-क्रीडामन्त्री मनसुख-माण्डविया अवदत् यत् प्रधानमन्त्रिणः मोदिनः कुशल नेतृत्वे क्रीडा राष्ट्रिय-प्राथमिकता-रूपेण अथ च युव-सशक्तीकरणस्य महत्त्वपूर्ण-साधन-रूपेण च संवर्धते।

## नेपाल-देशे आकस्मिक-जलाप्लावेन मृतानां संख्या सप्तत्यधिक-द्विशतपरिमिता जाता, विलुप्तानाम् अन्वेषणाय च अन्वेषणकार्यं निरन्तरं प्रचलति



नेपाल-देशे सञ्जाते आकस्मिक-जलाप्लावे मृतानां संख्या प्रवृद्ध्य सप्तत्यधिक-द्विशतं सम्प्राप्ता। देशस्य इयम् अतीव दारुणतमा आपत् मन्यते, यत्र अष्टाशीत्यधिक-द्विशतं भारतीय पर्यटकान् अन्तर्भूय सहस्रशः विलुप्त-जनानाम् अन्वेषणाय नेपाल-प्रशासन-संस्थाः तीव्रगत्या समुद्धरण-कार्याणि प्रचालयन्ति। ह्यः दुरापन्नेन जलाप्लावेन नेपालस्य त्रिषु जनपदेषु व्यापकः विनाशो जातः। नेपाल-आरक्षी-बलेन सूचितं यत् त्रिनवतिः (९३) नूतन-शवाः प्राप्ताः। तिब्बत-नेपाल-प्रशासनानुसारम् एतावता त्रयोदश-शताधिक-जनाः विलुप्ताः सन्ति, येषु बहवः वैदेशिकाः वर्तन्ते। उभयोः अधिकारिभिः ज्ञापितं यत् प्रायः त्रिंशदधिक-देशानां नागरिकाः विलुप्ताः अभवन्, येषु प्रमुखतया भारतस्य, अमेरिका-देशस्य, मलेशिया-यूक्रेन-ऑस्ट्रेलिया-ब्रिटेन-कनाडा-दक्षिणकोरिया-सिङ्गापुर-जर्मनी-रूस-देशानां पर्यटकाः सम्मिलिताः सन्ति।




## प्रधानमन्त्री जन-धन योजना स्वकीयानि द्वादश वर्षाणि पूरिता

प्रधानमन्त्री जन-धन योजना स्वकीयानि द्वादश वर्षाणि पूरिता। अस्याः योजनायाः शुभारम्भः चतुर्दशोत्तरद्विसहस्रतम वर्षस्य अगस्त-मासस्य अष्टाविंशतितिदिनाङ्के प्रधानमन्त्रिणा नरेन्द्र-मोदिना कृतः आसीत्। वित्त मन्त्रालयस्य सद्य-सूचनानुसारं सम्प्रति देशे नवपंचाशत् कोट्यधिकाः जन-धन-कोषाः उद्घाटिताः, येषु आहत्य प्रायः त्रि लक्ष रूप्यकाणि प्राप्तानि । एषा योजना देशस्य आर्थिक-सशक्तीकरणे जन-साधारणस्य स्वावलम्बने च महतीं भूमिकां निर्वहति।

## प्रधानमन्त्री - बालकृष्णन

विवेकानन्द-केन्द्रस्य पूर्व-राष्ट्रियाध्यक्षस्य ए. बालकृष्णन् वर्यस्य निधने प्रधानमन्त्री नरेन्द्र मोदी अनुशोचितवान्। प्रधानमन्त्रिणा संस्मृतं यत् बालकृष्णन् वर्येण पञ्चदशकाधिकं कालं यावत् स्वामी-विवेकानन्दस्य विचारान् जनं जनं प्रति नेतुम् राष्ट्र-सेवायै च जीवनं समर्पितम्। पूर्वोत्तर-भारते शिक्षा-सामाजिक-विकास-क्षेत्रेषु तस्य योगदानं सर्वदा स्मरिष्यते।

## बिहार-उत्तर-प्रदेशयोः जलाप्लावनस्थितिं सम्मुखीकर्तुं एनडीआरएफ-दलानां विहितं नियोजनम्

राष्ट्रीय-आपद्-प्रबन्धन-बलेन स्पष्टीकृतं यत् नेपाल-देशे आकस्मिक आप्लावेन बिहार-उत्तरप्रदेशयोः सीमावर्ती क्षेत्रेषु सम्प्रति कोऽपि प्रतिकूल प्रभावः न सञ्जातः। तथापि राज्यप्रशासनेन सह समन्वयं विधाय स्थितेः अनवरतं निरीक्षणं विधीयते। एन.डी.आर.एफ.-महानिरीक्षकः नरेन्द्र सिंह बुन्देला अवदत् यत् उभयोः राज्ययोः विंशतिः दलानि निरतानि सन्ति, येषु नव दलानि बिहारे एकादश च उत्तरप्रदेशे सेवानिरतानि सन्ति। आपत्काले जल-सङ्कटे वा जनानाम् उद्धाराय, सुरक्षितस्थान-नयनाय तथा आपद्-शमनाय एतैः दलैः सुरक्षा-सज्जता कृता अस्ति।

## सम्भाषण-मञ्चे ईरान-देशस्य प्रत्यागमनाय कापि निश्चित-समय-सीमा नास्तीति

### अमेरिकीराष्ट्रपतिः डोनाल्ड ट्रम्पः

अमरीका-राष्ट्रपतिः डोनाल्ड ट्रम्पः संसूचितवान् यत् ईरानेन सह वार्ता-पुनरारम्भाय कोऽपि त्वरित-काल-सीमा नास्ति। ईराने आर्थिक सङ्कटस्य उल्लेखं कुर्वन् ट्रम्पः अवदत् यत् अमरीका-देशः सुदृढ-स्थितौ अस्ति। अपरपक्षे, अतिचिन्तां शमनाय वार्ता-वातावरण-निर्माणाय च कतार-प्रधानमन्त्री मोहम्मद-बिन-अब्दुलरहमानः तेहरान नगरे ईरानी-अधिकारिभिः सह मन्त्रणां करिष्यति ।

# भारतम् अद्य परिवर्तनस्य नव-आत्मविश्वासस्य च महत्वपूर्ण-युगात् गच्छत् अस्ति : उपराष्ट्रपतिः



उपराष्ट्रपतिः सी. पी. राधाकृष्णन् अवदत् यत् भारतम् अद्य परिवर्तनस्य नव-आत्मविश्वासस्य च महत्वपूर्ण-युगात् गच्छन् अस्ति। इदं सामूहिक-सङ्कल्पस्य प्रयासानां च परिणामं दर्शयति। राज्यसभा-सांसद-घनश्याम-तिवारी-महोदयेन लिखितायाः 'संकल्प से सिद्धि का मोदी युग' इति पुस्तकस्य लोकार्पणं कुर्वन् उपराष्ट्रपतिः एतत् न्यवेदयत्।सः अकथयत् यत् प्रौद्योगिकीम् अग्रेसरीकर्तुम्, आधुनिक-मूलभूत-संरचनायाः निर्माणं कर्तुम्, राष्ट्रिय-एकतां सुदृढीकर्तुम्, महिला-नेतृत्व-युक्त-विकासं च प्रोत्साहयितुं शिक्षा सशक्तिकरणस्य महत्वपूर्णं माध्यमम् अस्ति। श्री-राधाकृष्णन्-महोदयः सशक्तस्य समृद्धस्य च भारतस्य निर्माणे देशस्य युवानां, महिलानां, कृषकाणां, श्रमिकाणां प्रत्येक-नागरिकस्य च योगदानम् अपि रेखाङ्कितवान्। सः अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी विश्वस्य एकमात्रः एतादृशः नेता अस्ति, यः कोविड-महामारी-काले न केवलं १४० कोटि-भारतीयेभ्यः, अपि तु १०० तः अधिक-देशेभ्यः अपि निःशुल्क-कोविड-सूच्यौषधं (वैक्सीन) प्रदत्तवान्।

# भारतीय-ऋतु-विज्ञान-विभागेन बिहार-छत्तीसगढ-झारखण्ड--पूर्वोत्तर-राज्येषुशनिवासरं यावत् अतिवृष्टिपरं पूर्वानुमानं कृतम्



भारतीय-ऋतु-विज्ञान-विभागेन शनिवासरं यावत् बिहार-छत्तीसगढ़-झारखण्ड-पूर्वोत्तर-राज्येषु अति-वृष्टेः पूर्वानुमानं प्रकटितम्। विभागेन ओडिशा, उप-हिमालयी-पश्चिम-बंगाल तथा सिक्किम-राज्येषु अपि अति-वृष्टेः सम्भावना व्यक्ता। सहैव शनिवासरे रविवासरे च ओडिशा-राज्यस्य कतिपयेषु पृथक् पृथक्-स्थानेषु अतीव-भीषण-वृष्टिः भवितुं अर्हति। ऋतु-विभागानुसारम् अग्रिम-दिनद्वये अण्डमान-निकोबार द्वीपसमूहेषु, आन्ध्रप्रदेशे, तमिलनाडु-राज्ये, पुदुच्चेर्यां तथा करैकल-क्षेत्रेषु च भीषण-मेघगर्जनेन, विद्युत्-पातेन तीव्र-झंझावातेन च सह वर्षायाः पूर्वानुमानं विहितम् अस्ति।

प्रधानमन्त्री जन-धन योजना

# पलाण्डोः उपलब्धतां सुनिश्चितीकर्तुं सर्वकारेण 'बफर-स्टॉक्' इत्यस्मात् पलाण्डु-विक्रयणम् आरब्धम्



आगामिषु मासेषु पलाण्डोः पर्याप्ताम् उपलब्धतां सुनिश्चितीकर्तुं तथा च ऋतुकृत-मूल्यवृद्धिं न्यूनीकर्तुं सर्वकारेण सुरक्षित-भण्डारात् (बफर-स्टॉक्) पलाण्डोः नियन्त्रितं लक्षितं च विक्रयणम् आरब्धम्। उपभोक्ता-कार्य-विभागस्य सचिवायाः निधि-खरे-महोदयायाः द्वारा नवदेहल्याः कृषिभवनात् राष्ट्रिय-राजधानी-क्षेत्रस्य उपभोक्तृभ्यः पलाण्डोः खुदरा-विक्रय-वाहनानि प्रेषितानि। सर्वकारस्य मूल्य-स्थिरीकरण-कोषात् पलाण्डुः प्रति-किलोग्रामं ३५ रूप्यकाणां रियायती-मूल्ये एन्.सी.सी.एफ्., नेफेद्, केन्द्रीय-भण्डारस्य च विक्रय-केन्द्रेभ्यः तथा च देहल्यां चल-वाहनानां (मोबाइल वैन) माध्यमेन विक्रीयते। श्रीमती निधि खरे अकथयत् यत् सर्वकारः प्रतिवर्षम् एतत् निश्चिनोति यत् पलाण्डु-मूल्यवृद्धौ सत्यां खुदरा-हस्तक्षेपेन जनेभ्यः न्यूनमूल्ये पलाण्डुः प्राप्येत। सा अवदत् यत् देशे पलाण्डोः उत्पादने उपलब्धौ वा कापि न्यूनता नास्ति। उपभोक्ता-कार्य-मन्त्रालयस्य अनुसारम् आगामिषु मासेषु आन्तरिक-माङ्गं पूरयितुं पलाण्डोः उपलब्धता पर्याप्ता वर्तते। २०२५-२६ वर्षे पलाण्डोः उत्पादनं ३०७ लक्ष-मीट्रिक्-टन् परिमाणात् अधिकं भविष्यति इति अनुमानम् अस्ति।

# भारतं निर्माणस्य, नवाचारस्य, निर्यातस्य च कृते द्रुतगत्या वैश्विकमञ्चरूपेण उद्भवतिः वित्तमन्त्री निर्मला सीतारामन



वित्तमन्त्री निर्मला सीतारामन् अवदत् यत् भारतं निर्माणस्य, नवाचारस्य, निर्यातस्य च कृते द्रुतगत्या वैश्विकमञ्चरूपेण उद्भवति। सा कनाडादेशस्य निवेशकान् भारतस्य वर्धमानक्षमतायाः लाभं गृहीत्वा गृहस्य अन्तर्राष्ट्रीयस्य चोभयोः आपणयोः आवश्यकताः पूरयितुम् न्यमन्त्रयत्। सा अवदत् यत् सुधारैः जायमानाः परिवर्तनानाम्, सुदृढा आर्थिकवृद्धिः च भारत-कनाडा-मध्ये अधिकां दृढां निवेशाधारिताम् आर्थिकसहभागिताम् सृजन्ति। वित्तमन्त्री अद्य टोरन्टो-नगरे उच्चस्तरीयव्यापारसम्मेलने अवदत् यत् सुधारः, डिजिटल-तकनीकी, आधारभूतसंरचनायां निवेशः, लक्षितनीतिगतसमर्थनं च देशे दीर्घकालिकनिवेशस्य वातावरणं निरन्तरं सुदृढं कुर्वन्ति। सा कनाडादेशस्य कम्पनीनां निवेशकानां च आह्वानम् अकरोत् यत् भारतं केवलं निवेशगन्तव्यरूपेण एव मा पश्यन्तु, अपितु वैश्विकविकासाय रणनीतिकसहयोगीरूपेण मञ्चरूपेण च पश्यन्तु। सा व्यवसायिनाम् आग्रहम् अकरोत् यत् भारतस्य अन्तर्राष्ट्रीयविपण्यां च आवश्यकतापूर्त्यै दीर्घकालिकसञ्चालनानि सहभागिताञ्च स्थापयेयुः। वित्तमन्त्री अवदत् यत् वर्ष २०३० पर्यन्तं भारत-कनाडा-मध्ये द्विपक्षीयव्यापारं वार्षिकं सप्तति (७०) अब्ज डॉलर्-पर्यन्तं प्रापयितुम् लक्ष्यः अस्ति।

# शिवा-आयुर्वेदिक-चिकित्सामहाविद्यालये संस्कृतसप्ताहसमारोहाणाम् आयोजनम्



**हिमसंस्कृतवार्ताः-** संस्कृतदिवसोपलक्ष्ये शिवा-आयुर्वेदिक- महाविद्यालये चान्दपुरे संस्कृतभाषां लोकप्रियां विधातुं, छात्रान् संस्कृतज्ञानप्राप्तये प्रेरयितुं तथा च संस्कृतभाषायाः वेदेषु, उपनिषत्सु, पुराणेषु, महाभारते, रामायणे इत्यादिषु ग्रन्थेषु विद्यमानान् नैतिक- सामाजिक- मानवीयमूल्यान् छात्राणां माध्यमेन समाजे प्रसारयितुं 24-08-2026 दिनाङ्कतः 26-08-2026 दिनाङ्कपर्यन्तं विविधानां कार्यक्रमाणां संयोजनं कृतम्। 24-08-2026 दिनाङ्के महाविद्यालयस्य प्राङ्गणे रक्षाबन्धनम्, आयुर्वेदस्यावतरणम्, सुश्रुतेन वर्णितानि शल्योपकरणानि इत्यादिषु विषयेषु रङ्गोली-प्रतियोगिता आयोजिता। आयुर्वेदसंहितानां सम्यगुच्चारणस्य सस्वरगानस्य च प्रशिक्षणोद्देश्येन स्नातक- स्नातकोत्तरवर्गाणां सर्वेभ्यः छात्रेभ्यः संहितापारायणं कारितम्। 25-08-2026 दिनाङ्के आयुर्वेदस्याशुद्धशब्दानां शुद्धीकरणस्य, वाग्भटसंहितायाः च शब्दानाम् अर्थलेखनस्य द्वे प्रतियोगिते आयोजिते। 26-08-2026 दिनाङ्के विशेषसमारोहस्य आयोजनमभवत्। यस्मिन् उच्चारणप्रतियोगिता, अव्यवस्थितश्लोकपदानां व्यवस्थापनप्रतियोगिता, भाषणप्रतियोगिता, श्लोकोच्चारणप्रतियोगिता, संस्कृतसम्भाषणं, संस्कृतस्तोत्रस्य नृत्यरूपान्तरणं, संस्कृतगीतं, संस्कृतनाटिका चेत्यादयः प्रतियोगिताः आयोजिताः। अस्मिन् अवसरे संस्कृतप्राध्यापकेन डॉ. एल. आर. शर्मा महोदयेन संस्कृतस्य महत्त्वं प्रकाशयतां पण्डितनेहरू- महर्ष्यरविन्द- महात्मागान्धिप्रभृतीनां वचनानि प्रदर्श्य संस्कृतस्य महत्त्वं प्रतिपादितं भगवतः श्रीरामस्य जीवनादर्शानाम्-

> सत्यं दानं तपस्त्यागो मित्रताशौचमार्जवम्।

> विद्या च गुरुशुश्रूषा ध्रुवाण्येतानि राघवे॥ (वा०रा०)

- इत्यस्य श्लोकस्योपरि प्रकाशः निक्षिप्तः।

समारोहस्यास्मिन् अवसरे महाविद्यालयस्य प्राचार्याः डॉ. राजेशसूद महोदयाः शोभनप्रस्तुतिभ्यः छात्रान् तेषां मार्गदर्शकांश्च अभिनन्दितवन्तः। तैः 1969 तमे वर्षे प्रारब्धस्य संस्कृतदिवसस्य महत्त्वं प्रतिपादितं, छात्रेभ्यः सर्वाः सद्गुणाः स्व-आचरणे आनेतुं प्रेरणायुक्तः आग्रहः कृतः।

# त्रिषु वर्षेषु हिमाचलं सम्प्राप्ताः ७.५९ कोटि-पर्यटकाः, २.६४ लक्षं वैदेशिक-पर्यटकाः, आङ्ग्लदेशात् सर्वाधिकम्

हिमसंस्कृतवार्ता — शिमला। हिमाचलप्रदेशस्य प्राकृतिक-सौन्दर्यं द्रष्टुम् आङ्ग्लदेश-अमेरिका-स्विट्जरलैण्ड्-प्रभृतिभ्यः विविध-देशेभ्यः पर्यटकाः आगच्छन्ति। 'यूनाइटेड् किङ्गडम्' (UK) देशस्य पर्यटकेभ्यः विशेषतया हिमाचलस्य यात्रा अतीव रोचते। अस्य एकं कारणम् एतदपि स्यात् यत् ब्रिटिश-शासनकाले शिमला भारतस्य ग्रीष्मकालीन-राजधानी आसीत्। केवलम् यूरोप-देशेभ्यः एव न, अपि तु इस्लामी-देशेभ्यः अपि पर्यटकाः हिमाचलम् आगताः। साउदी-अरेबिया-देशात् आगतानां पर्यटकानां सङ्ख्या अपि विस्मयकारिणी वर्तते। पाकिस्तान-देशादपि हिमाचल-भ्रमणाय सप्त (७) पर्यटकाः आगताः सन्ति। बाङ्गलादेशात् अपि प्रायः चतुः-सहस्रं (४,०००) पर्यटकाः हिमाचल-भ्रमणाय आगताः। काङ्ग्रेस-विधायकस्य राकेशकालिया-महोदयस्य प्रश्नस्य प्रत्युत्तरे मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खू-महोदयेन एषा लिखित-सूचना प्रदत्ता।

### त्रिषु वर्षेषु ७.५९ कोटि-पर्यटकाः

हिमाचले त्रि-वर्ष-कालावधौ ७.५९ कोटि-तः अधिकाः पर्यटकाः आगताः। एषा गणना अस्मिन् वर्षे अगस्त-मासं यावत् संकलिता वर्तते। २०२३ तमे वर्षे १.६० कोटि-तः अधिकैः पर्यटकैः हिमाचलस्य सौन्दर्यस्य आनन्दः गृहीतः। २०२४ तमे वर्षे एषा सङ्ख्या १.८१ कोटि-तः अधिका आसीत्। २०२५ तमे वर्षे धार्मिक-पर्यटकानाम् अपि गणना प्रारब्धा, येन २०२५ तमे वर्षे पर्यटकानाम् आगमनम् ऐतिहासिक-कीर्तिमानं स्थापयित्वा ३.११ कोटि-पर्यन्तं सम्प्राप्तम्। २०२६ तमे वर्षे अगस्त-मासं यावत् १.०६ कोटि-पर्यटकानाम् आगमनं पञ्जीकृतम् अस्ति। त्रिषु वर्षेषु राज्ये विदेशेभ्यः आहत्य २,६४,८२४ पर्यटकाः आगताः। एतेषु सर्वाधिकं ४९,०२९ पर्यटकाः 'यूनाइटेड् किङ्गडम्' (UK) देशस्य सन्ति।

### कस्मात् देशात् कियन्तः पर्यटकाः समागताः?


| देशस्य नाम | पर्यटकानां सङ्ख्या |
|---|---|
| यूनाइटेड् किङ्गडम् (UK)- | ४९,०२९ |
| अमेरिका (USA) - | २६,२०७ |
| ऑस्ट्रेलिया - | १५,२२६ |
| जर्मनी - | ९,२८३ |
| फ्रान्स - | ८,४१७ |
| कनाडा - | ७,३२३ |
| मलेशिया - | ५,७१३ |
| श्रीलङ्का - | ५,५७८ |
| इटली - | ५,००१ |
| बाङ्गलादेशः - | ३,९८९ |
| सिङ्गापुरम् - | ३,५२२ |
| स्विट्जरलैण्ड् - | ३,३९८ |
| जापानम् - | २,७६५ |
| यूएई (UAE) - | ६७७ |
| साउदी-अरेबिया - | ४३३ |
| ईरानम् - | २४० |
| पाकिस्तानम् - | ७ |
| अन्येभ्यः देशेभ्यः - | १,१८,०१६ |
| आहत्य (कुलम्) | २,६४,८२४ |

# आईजीएमसी-चिकित्सालये 'स्वाइन-फ्लू' रोगस्य प्रवेशः; द्वयोः परीक्षण-प्रतिवेदनं धनात्मकम्, चिकित्सालये निर्मितः पृथक्करण-कक्षः




**हिमसंस्कृतवार्ता — शिमला।**
टाण्डा-चम्बा-आयुर्विज्ञान-महाविद्यालययोः (Medical Colleges) अनन्तरम् अधुना इन्दिरागान्धी-आयुर्विज्ञान-महाविद्यालये चिकित्सालये (IGMC) चापि 'स्वाइन-फ्लू' रोगस्य प्रवेशः जातः। अत्र द्वयोः रुग्णयोः परीक्षण-प्रतिवेदनं धनात्मकं सम्प्राप्तम्। तयोः एकस्य स्वास्थ्ये परिष्कारे सति सः चिकित्सालयात् मुक्तः, यदा तु अपरस्य रुग्णस्य चिकित्सा प्रचलन्ती वर्तते।
विज्ञायते यत् एतौ विषाणु-सङ्क्रमणस्य (Viral) लक्षणैः सह चिकित्सालयं प्राप्तवन्तौ। तदनन्तरं रुग्णयोः 'स्वाइन-फ्लू' परीक्षणं कारितम्, यस्मिन् द्वयोः अपि प्रतिवेदनं धनात्मकम् आगतम्।
चिकित्सालय-प्रबन्धनानुसारम् एकः रुग्णः बुधवासरे चिकित्सालये पृथक् स्थापितः आसीत्। सहैव तस्य परीक्षण-प्रतिदर्शः (Sample) गृहीतः, यस्य प्रतिवेदनं धनात्मकं सम्प्राप्तम्। गुरुवासरे वैद्यानां परीक्षणानन्तरं स्वास्थ्ये परिष्कारात् तस्मै चिकित्सालयात् मुक्तिः दत्ता, साकमेव अवधानेन स्थातुं परामर्शः अपि प्रदत्तः।
अपरपक्षे द्वितीयः रुग्णः गुरुवासरे प्रातःकाले चिकित्सालयं प्राप्तवान्। तस्मिन् 'स्वाइन-फ्लू' लक्षणानि दृष्ट्वा परीक्षण-प्रतिदर्शस्य गवेषणे सति प्रतिवेदनं धनात्मकम् आगतम्। सः पृथक्करण-कक्षे (Isolation Ward) संस्थाप्य उपचर्यते। आईजीएमसी-चिकित्सालये 'कोविड्'-कक्षम् अधुना 'स्वाइन-फ्लू'-पृथक्करण-कक्ष-रूपेण परिवर्तितम् अस्ति। अत्रौषधैः सह अन्यानि आवश्यक-उपकरणानि संभृतानि सन्ति। सहैव चिकित्सालये आगच्छतां रुग्णानां यादृच्छिक-प्रतिदर्श-परीक्षणम् अपि विधीयते। आईजीएमसी-संस्थानस्य चिकित्सा-अधीक्षकः डॉ. राहुलरावः विज्ञापितवान् यत् साम्प्रतं द्वयोः रुग्णयोः 'स्वाइन-फ्लू' प्रतिवेदनं धनात्मकं प्राप्तम्। चिकित्सालय-प्रशासनेन अस्य रोगस्य प्रकरणानां सततं निरीक्षणं क्रियते।

# कृषि-उद्यान-विश्वविद्यालययोः कुलपतीनां नियुक्ति-सम्बद्धं संशोधन-अधिनियमम् उच्चन्यायालयेन निरस्तम्




**हिमसंस्कृतवार्ता — शिमला।**
हिमाचलप्रदेश-उच्चन्यायालयेन पालमपुर-स्थिते कृषि-विश्वविद्यालये तथा नौणी-स्थिते डॉ. यशवन्तसिंहपरमार-औद्यानिकी-वानिकी-विश्वविद्यालये च कुलपतीनां नियुक्ति-सम्बद्धं राज्य-सर्वकारस्य संशोधन-अधिनियमं नियमांश्च असंवैधानिकं मत्वा निरस्तं कृतम्। उच्चन्यायालयेन राज्य-सर्वकार-पक्षतः २६ फरवरी २०२६ दिनाङ्के उभयोः विश्वविद्यालययोः कुलपति-पदाय प्रसारिते द्वे अपि विज्ञापने तत्क्षणमेव प्रभावेण निष्प्रभावे कृते।
न्यायाधीशस्य विवेकसिंहठाकुरस्य तथा च न्यायाधीशस्य रञ्जनशर्मणः खण्डपीठेन राज्य-सर्वकारः कुलाधिपतिः (राज्यपालः) च निर्दिश्य प्रोक्तं यत् उभयोः विश्वविद्यालययोः कुलपतेः चयन-नियुक्ति-प्रक्रिया 'यूजीसी-विनियम-२०१ इत्यस्य अन्तर्गतं पुनः प्रारभ्यताम्। नूतन-चयन-समितौ विश्वविद्यालय-अनुदान-आयोगस्य (UGC) अध्यक्षस्य एकः नामाङ्कितः प्रतिनिधिः सम्मिलिष्यति। विश्वविद्यालयेन साक्षात् सम्बद्धाः अधिकारिणः यथा मुख्य-सचिवः चयन-समित्याः बहिः स्थास्यन्ति। यदि आवश्यकता भवेत् तर्हि भारतीय-कृषि-अनुसन्धान-परिषदः (ICAR) प्रतिनिधिः अपि समितौ समावेशयितुं शक्यते। खण्डपीठेन याचिकाः स्वीकुर्वत्या यूजीसी-नियमानाम् उल्लङ्घनेन राज्य-सर्वकारेण कृतानि वैधानिक-परिवर्तनानि अधिकार-क्षेत्रात् बहिः इति उद्घोषितानि।

### संशोधनानि अमान्यानि घोषितानि

न्यायालयेन हिमाचलप्रदेश-कृषि-औद्यानिकी-एवं-वानिकी-(संशोधनम्)-अधिनियम-२०२३ (२०२५ वर्षस्य अधिनियम-सङ्ख्या ४६) इत्यस्य धारा २३(४) तथा च धारा २४ इत्यनयोः कृतानि संशोधनानि निरस्तानि। न्यायालयेन दृष्टं यत् राज्य-सर्वकारेण कुलपतेः नियुक्तिं सर्वकारस्य साहाय्य-परामर्शाधीनं करणं 'यूजीसी-अधिनियम-१९५६' तथा 'यूजीसी-विनियम-२०१८' इत्यनयोः उल्लङ्घनं वर्तते, यत् राज्य-विधायिकायाः क्षमतायाः बहिः अस्ति।
राज्य-सर्वकारेण अधिसूचितानां हिमाचलप्रदेश-कृषि-औद्यानिकी-वानिकी-नियमाः २०२६ इत्यस्य नियम २, ३, ४ इत्येते अपि असंवैधानिकाः, अवैधाः, प्रारम्भादेव शून्याश्च घोषिताः। एते नियमाः यूजीसी-विनियम-२०१८ इत्यस्य ७.३ नियमस्य साक्षात् विरोधे प्राप्ताः।
राज्य-सर्वकारस्य तर्काः उच्चन्यायालयेन निरस्ताः
उल्लेखनीयं वर्तते यत् राज्य-सर्वकारेण २०२३ वर्षस्य संशोधन-अधिनियमेन २०२६ वर्षस्य नियमैश्च कुलपतेः नियुक्तौ मुख्य-सचिवस्य अध्यक्षतायां समिति-रचनायाः सर्वकारस्य परामर्शात् नियुक्तेश्च प्रावधानं कृतम् आसीत्। याचिकाकर्तृभिः तर्कः दत्तः यत् संविधानस्य अनुच्छेद २४६ तथा २५४ इत्यनयोः अनुसारम् उच्च-शिक्षायाः मानदण्डेषु संसदा निर्मितः केन्द्रीय-विधिः (UGC) राज्य-विधेः उपरि प्राधान्यं धरते। राज्य-सर्वकारेण तर्कः उपस्थापितः आसीत् यत् उभौ कृषि-विश्वविद्यालयौ स्तः, एतौ च यूजीसी-तः वित्तीय-साहाय्यं न प्राप्नुतः; विश्वविद्यालयौ राज्य-सर्वकारस्य आईसीएआर-संस्थायाश्च अनुदानेन सञ्चाल्येते, अतः अनयोः उपरि यूजीसी-नियमाः न प्रवर्तेरन्। उच्चन्यायालयः एतान् सर्वान् तर्कान् निरस्य स्पष्टीकृतवान् यत् यूजीसी-विनियम-२०१८ राज्य-विश्वविद्यालयेषु अपि प्रवर्तते, संसद्-विधेः विपरीतः निर्मितः कोऽपि राज्य-नियमः सांविधानिक-रूपेण अमान्यः एव सिद्ध्यति।

# अधुना गोपनीया भविष्यति महिला-उत्पीडनस्य परिवादः, सर्वकारः रचयिष्यति नूतनान् नियमान्



**हिमसंस्कृतवार्ता — शिमला।**

हिमाचलप्रदेशस्य कार्यस्थलेषु शैक्षणिक-संस्थानेषु च महिलानाम् उत्पीडनस्य गोपनीय-प्रतिवाद-प्रदानाय राज्यसर्वकारः नूतनान् नियमान् रचयिष्यति। विधानसभायाः प्रचलतः वर्षर्तु-सत्रस्य षष्ठे दिने प्रश्नोत्तर-काले विधायकस्य मलेंद्रराजन्-महोदयस्य प्रश्नस्य प्रत्युत्तरे मुख्यमन्त्री सुखविन्दरसिंहसुक्खु-महोदयः सदनस्य अन्तः एतां घोषणां कृतवान्। सः अवदत् यत् महिलाभ्यः सर्वत्र सम्मानं प्राप्तव्यम्। मुख्यमन्त्रिणा प्रोक्तं यत् महिलाः स्वकीयं प्रतिवादं पूर्णतया प्रकटयितुम् असमर्थाः भवन्ति, अतः सर्वकारः तादृशीं व्यवस्थां विधास्यति येन तासां प्रतिवादः पूर्णगोपनीया तिष्ठेत्। एतदर्थं सर्वकारेण नियमाः निर्मिष्यन्ते।

अस्मात् पूर्वं मलेंद्राजन्-महोदयस्य प्रश्नस्य लिखित-प्रत्युत्तरे स्वास्थ्य-परिवार-कल्याण-मन्त्री डॉ. धनीरामशाण्डिलः विज्ञापितवान् यत् २०२३-२४ तमे वर्षात् ३१ जनवरी २०२६ पर्यन्तम् प्रदेशस्य सर्वकारीय-अर्धसर्वकारीय-निजी-कार्यस्थलेषु शैक्षणिक-संस्थानेषु च महिलाभिः सह वञ्चनकपट-यौन-उत्पीडनस्य आहत्य १३१ प्रकरणाः प्राप्ताः सन्ति। मन्त्रिणा प्रोक्तं यत् अस्मिन् काले ३७ प्रकरणेषु दोषिणां विरुद्धं कार्यानुष्ठानं कृतम्, यत्र त्रिषु प्रकरणेषु दोषिणः सेवायाः निष्कासिताः, एकस्मिन् प्रकरणे च दोषिणः उपरि नियमानुसारं गम्भीरः दण्डः आरोपितः। तथैव एकस्मिन् प्रकरणे सेवा निलम्बिता, द्वयोः प्रकरणयोः दोषिणां विरुद्धम् प्रथमा सूचना (FIR) पञ्जीकृता। द्वयोः प्रकरणयोः सम्बन्धित-कर्मचारिणौ आरोप-पत्राङ्कितौ (चार्जशीट) कृतौ, नवसु च प्रकरणेषु दोषिणां स्थानान्तरणं विहितम्। एतदतिरिक्तं १९ प्रकरणेषु पारस्परिक-सहमत्या प्रकरणाः समाहिताः, क्षमायाचनायाः अनन्तरं सचेतना अपि प्रदर्शिता। मन्त्रिणा सूचयितं यत् भारतसर्वकारस्य महिला-बाल-विकास-मन्त्रालयेन 'उत्पीडन-इलेक्ट्रॉनिक-बाक्स' (SHe-Box) आरब्धम् अस्ति, यत् एकं केन्द्रीयकृतं जालपुटम् अस्ति। कार्यरताः महिलाः कार्यस्थले सञ्जातस्य यौन-उत्पीडनस्य प्रतिवादं प्रत्यक्षं पञ्जीकरणं कर्तुं, तासां स्थितिं ज्ञातुं गोपनीयतया निराकरणं च प्राप्तुं शक्नुवन्ति। तत्रैव राज्यस्य प्रत्येकस्मिन् मण्डले एका स्थानीय-समितिः निर्मिता अस्ति। ग्रामीण-क्षेत्रेषु प्रत्येकस्मिन् खण्डे उपमण्डले च तथा च नगरीय-क्षेत्रेषु वार्डेन नगरपालिकया वा एकः नोडल-अधिकारी अपि नियुक्तः अस्ति। मन्त्रिणा प्रोक्तं यत् त्रि-वर्ष-कालावधौ ९८ प्रकरणानाम् अन्वेषणं पूर्णम्, ३३ प्रकरणाः च लम्बिताः सन्ति।

# संस्कृतसप्ताहस्य द्वितीयदिवसे "मानवाधिकाराणाम् आधारः संस्कृतम्" विद्वद्भिः चर्चितम्



**हिमसंस्कृतवार्ता:- पौडीगढवालः, उत्तराखण्डम्।**

हेमवतीनन्दन- बहुगुणा- गढवाल- विश्वविद्यालयस्य (केन्द्रीय- विश्वविद्यालयस्य) डॉ. बी. जी. आर. परिसरे, पौडीगढवाले आयोजितस्य संस्कृतसप्ताहस्य द्वितीयदिवसस्य समापनं गरिमामयवातावरणे सम्पन्नम्। कार्यक्रमस्य अध्यक्षतां भौतिकविज्ञानविभागस्य विभागाध्यक्षः प्रो. पीयूषसिन्हा महोदयः अकरोत्। कार्यक्रमस्य शुभारम्भः वैदिकमङ्गलाचरणेन अभवत्, यत् केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्ति-परिसरस्य देवप्रयागस्थितस्य वेद- कर्मकाण्ड-पौरोहित्य- विद्याशाखायाः सहायकाचार्येण डॉ. अङ्कुरवत्सेन सश्रद्धं प्रस्तुतम्। अस्य कार्यक्रमस्य मुख्यवक्ता हरियाणा- संस्कृत- विद्यापीठस्य साहित्यविभागस्य सहायकाचार्यः डॉ. राधावल्लभशर्मा आसीत्। तेन "मानवाधिकाराणाम् आधारः संस्कृतम्" इत्यस्मिन् विषये विचाराः प्रस्तुताः। स्वव्याख्याने तेन संस्कृतभाषायाः मानवीयमूल्येषु, समतायाम्, अधिकारबोधे च महत्त्वपूर्णां भूमिकां प्रकाशिता। कार्यक्रमस्य संयोजकेन संस्कृतविभागाध्यक्षेण दिनेशचन्द्रपाण्डेयेन मुख्यवक्तुः परिचयः प्रस्तुतः, धन्यवादज्ञापनञ्च कृतम्। कार्यक्रमस्य समन्वयिका प्रो. कुसुमडोबरियालवर्या आसीत्। कार्यक्रमस्य कुशलं प्रभावशाली च सञ्चालनं पौडीपरिसरस्य शोधच्छात्रेण राहुलबलोदीद्वारा कृतम्। तस्य सहजया, सुस्पष्टया प्रभावशालिन्या च वाक्शैल्या समग्रः जनसमुदायः कार्यक्रमे अन्तपर्यन्तं संलग्नः अभवत्। अस्मिन् अवसरे संस्कृतस्य व्यापकं महत्त्वं तथा वर्तमानकाले तस्य प्रासङ्गिकता विषये सार्थकचर्चा अभवत्। संस्कृतसप्ताहस्य एषः कार्यक्रमः संस्कृतभाषायाः भारतीय- ज्ञान-परम्परायाश्च जागरूकतां सुदृढीकर्तुं प्रेरणादायकः अभवत्।

# रणवीर- परिसरे संस्कृतसप्ताहमहोत्सवे विद्वत्सम्मानं पुरस्कारवितरणं च सम्पन्नम्



**हिमसंस्कृतवार्ता:- प्रवेशकुमारशुक्लः, जम्मू।**

केन्द्रीय- संस्कृत- विश्वविद्यालयस्य श्रीमहाराजा-रणवीरसिंह- परिसरे, कोट-भलवाल, जम्मू इत्यत्र संस्कृत- सप्ताह- महोत्सवस्य अन्तर्गतं "सम्पूर्तिसमारोहः विद्वत्सम्मानं पुरस्कारवितरणं च" इति कार्यक्रमः गुरुवासरे 27 अगस्त 2026 दिनाङ्के वाणगीवलितसभागारे भव्यतया सम्पन्नः।

कार्यक्रमस्य अध्यक्षतां परिसरस्य निदेशकः प्रो. सतीशकुमारकपूरः अकरोत्। मुख्यातिथिरूपेण मोनिकाशर्मा, तहसीलदारः, भलवाल, जम्मू, उपस्थितासीत्। विशिष्टातिथिरूपेण ज्योतिषविभागस्य पूर्वविभागाध्यक्षः डॉ. चन्द्रमौलि रैना, सारस्वतातिथिरूपेण ज्योतिषविभागस्य पूर्वविभागाध्यक्षः डॉ. रामदासशर्मा च उपस्थितौ आस्ताम्। सम्मानितातिथिरूपेण पुरुषोत्तमलालदुबे, ओमप्रकाशसराफः च समुपस्थितौ आस्ताम्। कार्यक्रमस्य प्रारम्भः दीपप्रज्वलनेन वैदिकमङ्गलाचरणेन च अभवत्। अनन्तरं प्राविधिकदलस्य सहयोगेन सामूहिकगीतस्य प्रस्तुतिः, स्वागतभाषणं च सम्पन्नम्। परिसरस्य संयोजकेन डॉ. प्रमोदकुमारशुक्लेन संस्कृतसप्ताहमहोत्सवस्य कार्यक्रमानां संक्षिप्तं विवरणं प्रस्तुतम्। समारोहस्य प्रमुखाकर्षणं विद्वत्सम्मानसमारोहः आसीत्। अस्मिन् अवसरे परिसरस्य निदेशकः, पूर्वविभागाध्यक्षाः, सम्मानितातिथयः, अन्ये विद्वांसः च सम्मानिताः। संस्कृतक्षेत्रे तेषां दीर्घकालीनं योगदानं स्मृत्वा सम्मानपत्रैः पुष्पगुच्छैः च तेषां अभिनन्दनं कृतम्। कार्यक्रमे "संस्कृतसप्ताहप्रतिवेदनम्" अपि प्रस्तुतम्। ततः विशिष्टातिथीनां, सारस्वतातिथीनां, सम्मानितातिथीनां तथा मुख्यातिथेः उद्बोधनानि अभवन्। सर्वैः वक्तृभिः संस्कृतभाषायाः संरक्षणे, संवर्धने, प्रचार-प्रसारे च विशेषं बलं प्रदत्तम्।

समारोहस्य अन्यद् महत्त्वपूर्णं सोपानं "हिमालय-ट्रेकिंग- कुलपतिसंवाद- प्रतिभागिनां सम्माननं", पुरस्कारवितरणम् आसीत्। अस्मिन् प्रसङ्गे प्रतिभागिभ्यः परिसरस्तरीयाः, केन्द्रीय- विद्यालय- स्तरीयाः पुरस्काराः प्रदत्ताः। सम्भाषणकेन्द्रस्य, केन्द्रीयविद्यालयस्य च अध्यापकानां सम्माननमपि सम्पन्नम्। अध्यक्षीयोद्बोधने प्रो. सतीशकुमारकपूरः संस्कृतस्य महत्त्वं प्रतिपादयन् छात्राणां संस्कृताध्ययने सक्रियसहभागितायाः आवश्यकता प्रतिपादितवान्। डॉ. प्रवीणमणित्रिपाठी धन्यवादज्ञापनं कृतवान्। कार्यक्रमस्य समापनं राष्ट्रगानेन अभवत्। डॉ. मदनकुमारझा कार्यक्रमस्य सञ्चालनदायित्वं निर्वहन् समारोहं सफलतया सम्पन्नवान्।

सम्पूर्णः कार्यक्रमः डॉ. प्रमोदकुमारशुक्लस्य संयोजकत्वे, डॉ. रतनकुमारपाण्डेयस्य सहसंयोजकत्वे सुव्यवस्थितरूपेण सम्पन्नः। संस्कृतसप्ताहमहोत्सवस्य एषः सम्पूर्तिसमारोहः संस्कृतभाषायाः प्रचार-प्रसाराय, विदुषां च सम्मानाय महत्त्वपूर्णः प्रयासः इति सर्वैः प्रशंसितः।

# जम्मूप्रान्ते संस्कृतभारतीद्वारा संस्कृतप्रदर्शिनी आयोजिता



**हिमसंस्कृतवार्ताः- प्रवेशकुमारशुक्लः, जम्मू।**
केन्द्रीय- संस्कृत- विश्वविद्यालयस्य श्रीमहाराजा-रणवीरसिंहपरिसरे संस्कृतभारती- जम्मूप्रान्तस्य सौजन्येन संस्कृतभाषायाः प्रचारप्रसाराय, संस्कृतस्य च जनजीवनोपयोगितां प्रदर्शयितुं विविधविषयसम्बद्धा संस्कृतप्रदर्शिनी आयोजिता। प्रदर्शिनीं प्रति विश्वविद्यालयस्य छात्राणां अतिरिक्तं जम्मूनगरे स्थितेभ्यः केन्द्रीयविद्यालयेभ्यः, आर्मी- पब्लिक-स्कूल, दिल्ली-पब्लिक-स्कूल इत्यादिभ्यः विभिन्नविद्यालयेभ्यश्च छात्राः उत्साहपूर्वकं समागतवन्तः। अस्यां प्रदर्शिन्यां नित्यजीवनसम्बद्धाः विषयाः, सरलसंस्कृतसम्भाषणं, संस्कृतव्याकरणस्य मूलभूतज्ञानं, संस्कृतभाषायाः व्यवहारोपयोगिता च विविधैः रोचकप्रदर्शनैः माध्यमैश्च प्रस्तुताः। तत्र विविधाः संस्कृतपुस्तकानिप्रदर्शितानि। तदतिरिक्तं वैज्ञानिकरीत्या श्लोकानां भावार्थः, तेषां वैज्ञानिकपक्षः तथा संस्कृतवाङ्मयस्य ज्ञानपरम्परया सह सम्बन्धश्च सरलतया बोधयितुं प्रयत्नः कृतः।
संस्कृतभारती संस्कृतभाषायाः प्रचार-प्रसाराय निरन्तरं कार्यरतं प्रमुखं संस्थानमस्ति। संस्था संस्कृतसम्भाषणशिबिराणां, संस्कृतकक्षाणां, प्रशिक्षणवर्गाणां, विविधशैक्षिककार्यक्रमाणां च आयोजनं कृत्वा संस्कृतभाषां जनसामान्यस्य समीपं नयति। संस्कृतं केवलं प्राचीनग्रन्थानां भाषा नास्ति, अपि तु अद्यतनजीवनेऽपि सरलतया व्यवहारयोग्या भाषा अस्ति। भावनां समाजे प्रसारयितुं संस्कृतभारती विशेषप्रयत्नं करोति। संस्कृतभाषायां निहितं ज्ञानं, संस्काराः, वैज्ञानिकचिन्तनं, नैतिकमूल्यानि च नूतनपीढ्याः समीपं नेतुं संस्थायाः कार्यं प्रशंसनीयमस्ति। विशेषतः बालानां युवानां च मध्ये संस्कृतभाषां प्रति रुचिं जनयित्वा भारतीयज्ञानपरम्परया सह तेषां सम्बन्धं दृढीकरोति। एतादृशैः कार्यक्रमैः समाजे संस्कृतस्य प्रति नवीनजागरूकता जायते तथा भारतीयसंस्कृतेः संरक्षणे संवर्धने च जनसहभागिता वर्धते। प्रदर्शिन्याः प्रमुखोद्देश्यं संस्कृतभाषां केवलं प्राचीनभाषारूपेण न प्रस्तुत्य आधुनिकजीवनेऽपि तस्याः उपयोगितां जनानां विशेषतः विद्यार्थिनां पुरतः प्रत्यक्षतया स्थापयितुम् आसीत्। विभिन्नविद्यालयेभ्यः समागताः छात्राः प्रदर्शिन्यां प्रदर्शितान् विषयान् साक्षात् अवलोक्य संस्कृतभाषायाः सरलतां, वैज्ञानिकतां, व्यावहारिकतां च ज्ञातवन्तः। अस्याः प्रदर्शिन्याः सफलसञ्चालने संस्कृतभारती- जम्मूप्रान्तस्य सदस्यैः महत्त्वपूर्णा भूमिका निर्वहिता। तेषु डॉ. आशीषकुमार, डॉ. स्नेहलता, डॉ. खेमनारायणः, डॉ. अखिलेशकुमारः, राहुलमिश्रः, आशुतोषकाला, दक्षः, अंकुशः, अक्षयः, सचिनशर्मा, नीरज, रीतिका, रीतिका कुमारी, जाह्नवी इत्येते च प्रमुखरूपेण सक्रियाः आसन्। ते आगतानां विद्यार्थिनां प्रदर्शिन्यां प्रदर्शितानां विषयाणां विषये सरलतया परिचयः प्रदत्तवन्तः, संस्कृतभाषां च प्रति तेषां जिज्ञासां वर्धितवन्तः। एषा प्रदर्शिनी संस्कृतभाषायाः प्रचार-प्रसारस्य दिशि महत्त्वपूर्णं पदक्षेपं सिद्धा अभवत्। विशेषतः विद्यालयीय-छात्राणां मध्ये संस्कृतभाषां प्रति रुचिजननेन संस्कृतस्य अध्ययनं तथा व्यवहारिकप्रयोगं प्रति सकारात्मकदृष्टिकोणस्य विकासे अस्याः प्रदर्शिन्याः महत्त्वपूर्णं योगदानम् अभवत्। संस्कृतभाषा भारतीयज्ञानपरम्परायाः अमूल्यनिधिः अस्ति; अतः तस्याः संरक्षणं, संवर्धनं, प्रचारश्च केवलं संस्थानां दायित्वं न, अपि तु समाजस्य प्रत्येकस्य सदस्यस्य सामूहिकदायित्वम् अस्ति।

# सन्तसहारा- आयुर्वेदिक एवं चिकित्सीय- महाविद्यालये
## नवदिवसीय- संस्कृत- सम्भाषणस्य
# कार्यशालायाः समापनम्




**हिमसंस्कृतवार्ताः-** पञ्जाबप्रान्तस्य बठिण्डानगरे स्थिते सन्तसहारा आयुर्वेदिक एवं चिकित्सीयमहाविद्यालयः एवं संस्कृतभारती पञ्जाबप्रान्तः एतयोः संयुक्ततत्त्वावधाने आयोजितायाः नवदिवसीय- संस्कृत- सम्भाषणस्य कार्यशालायाः गतदिने समापनं जातम्। समापनकार्यक्रमस्य शुभारम्भः दीपप्रज्वलनेन दीपमन्त्रेण च अभवत्। कार्यक्रमे छात्रछात्राभिः सरस्वतीवन्दना, उद्देश्यगीतम्, नाटकम्, सांस्कृतिकनृत्यम्, इत्यादयः प्रस्तुतयः कृताः। प्रशिक्षकः शशिकान्तशास्त्रिमहोदयः संस्कृतसम्भाषणकार्यशालां सम्यक् चालितवान्। तस्य अध्यापनशैली मधुरा, सरला, रोचका च आसीत्। छात्रछात्राः आनन्देन संस्कृतं पठितवन्तः। कार्यक्रमे अस्मिन् मुख्यवक्तृरूपेण बठिण्डा जनपदस्य संस्कृतभारत्याः अध्यक्षा डा. डिम्पलशर्मा महोदया आगता। सा उक्तवती यत् वैद्यानां कृते किमर्थं संस्कृतम् आवश्यकम्। यत्र संस्कृतम् अस्ति तत्र संस्कारः, यत्र संस्कारः अस्ति तत्र अस्माकं संस्कृतिः। उपाचार्येण वैद्येन लवनीशमहोदयेन उक्तं यत् आयुर्वेदस्य सर्वे ग्रन्थाः यथा चरकसंहिता, सुश्रुतसंहिता, अष्टाङ्गहृदयादयः संस्कृतभाषायाम् एव सन्ति। अनेन संस्कृतसम्भाषणेन छात्राणां कृते बहवे लाभाय भविष्यति। कार्यक्रमे अध्यक्षरूपेण प्राचार्यः वैद्यः श्रीदेवफोन्दणी उक्तवान् यत् यः आयुर्वेदस्य उत्तमं कुशलं निपुणं भवितुं पुनश्च वैद्यकीयं साधयितुम् इच्छति तस्य कृते संस्कृतं बहु आवश्यकम्। यतोहि वयं सर्वे संस्कृतेन आयुर्वेदस्य औषधं चिकित्सां च ज्ञातुं शक्नुमः। अस्मिन् कार्यक्रमे ६० छात्रछात्राः भागं स्वीकृतवन्तः। प्राचार्येण डॉ. श्रीदेवफोन्दणीमहोदयेन, उपाचार्येण डॉ. लवनीशमहोदयेन च आगतानाम् अतिथीनां स्मृतिचिह्नेन स्वागतं कृतम्। अस्मिन् अवसरे ८ प्राध्यापकाः, १० प्राध्यापिकाः, ८० छात्राः च समुपस्थिताः आसन् ।

# ‘श्रेष्ठशाला-सन्दर्शनम्’ अन्तर्गतं श्रीसोनारी- प्राथमिक- विद्यालयस्य सन्दर्शनम्



**हिमसंस्कृतवार्ताः- जगदीश डाभी, गुजरातम्**
अद्य श्रीसोनारी-प्राथमिकविद्यालये ‘श्रेष्ठशाला-सन्दर्शनम्’ इत्यन्तर्गतं गिरसोमनाथ-जनपदस्य वेरावल- सूत्रापाडा- कोडिनार- त्रयाणां तालुकानां प्रायः २४० प्रधानाचार्यैः श्रीसोनारी- प्राथमिक-विद्यालयस्य सन्दर्शनं कृतम्। गिरसोमनाथ-जनपदस्य DIET- संस्थायाः प्राचार्येण पम्पाणिया-महोदयेन विद्यालयस्य विकासे प्रधानाचार्यस्य भूमिकाविषये विस्तृततया मार्गदर्शनं प्रदत्तम्। विद्यालयस्य प्रधानाचार्यया विजयाबेन-चुडासमा-महोदयया सर्वेषां आगन्तुकानां प्रधानाचार्याणां हार्दिकं स्वागतं कृतम्। ततः तया विद्यालयेन क्रियमाणानां विविधानां श्रेष्ठकार्याणां परिचयः प्रदत्तः। विद्यालयस्य विशेषतया प्रेरणादायिनी व्यवस्था एषा अस्ति यत् विद्यालयस्य शिक्षकाणां बालकाः अपि अस्मिन्नेव विद्यालये अध्ययनं कुर्वन्ति। तदतिरिक्तं समीपस्थेषु त्रयोदशपर्यन्तेषु ग्रामेषु निवसतां बालकानाम् अपि अत्र अध्ययनस्य अवसरः प्राप्यते। नायब-मामलतदारस्य बालकात् आरभ्य झोपडपट्टिकायां निवसतां बालकानां पर्यन्तं सर्वे बालकाः अत्र समानतया सह अध्ययनं कुर्वन्ति। विद्यालयस्य प्रधानाचार्यया एतादृश्यः अनेकाः प्रेरणादायिन्यः विषयाः प्रस्तुताः। आगन्तुकैः प्रधानाचार्यैः विद्यालयस्य शैक्षणिकानां भौतिकानां च विविधप्रवृत्तीनां निरीक्षणं कृतम्।
श्रीसोनारी- प्राथमिक- विद्यालयस्य श्रेष्ठाः शैक्षणिकपद्धतयः, कक्षायाः शैक्षणिकं वातावरणम्, अभिनवपरियोजनाः, क्रीडाः, विद्यालयस्य भौतिकं संरचनात्मकं च स्वरूपं तथा विविधाः सुविधाः च आगन्तुकैः प्रधानाचार्यैः प्रत्यक्षतया निरीक्षिताः। उपस्थितैः सर्वैः प्रधानाचार्यैः विद्यालयस्य व्यवस्थापनम्, गुणवत्तापूर्णं शिक्षणम्, उत्तमाः कार्यपद्धतयः च विषये परस्परं विचाराणाम् आदान-प्रदानं कृतम्।अनेन सन्दर्शनेन अन्येषां विद्यालयानाम् अपि श्रीसोनारी- प्राथमिकविद्यालयस्य विविधाः शैक्षणिकाः गतिविधयः तथा उत्तमाः कार्यपद्धतयः प्रेरणाप्रदाः भविष्यन्ति। सम्पूर्णः कार्यक्रमः सौहार्दपूर्णे वातावरणे सफलतया सम्पन्नः।

# महर्षिमहेशयोगि- वैदिक- विश्वविद्यालये कुलाधिपति- महोदयस्य जन्मदिवसावसरे एकदिवसीय- संगोष्ठ्याः पर्यावरणसंरक्षण- सांस्कृतिक- कार्यक्रमाणां च भव्यायोजनं सम्पन्नम्





**हिमसंस्कृतवार्ताः-** महर्षिमहेशयोगि- वैदिक- विश्वविद्यालयस्य कुलाधिपतेः वेदविद्यामार्तण्डस्य ब्रह्मचारिणः गिरीशजी- महोदयस्य २५/०८/२०२६ दिनांके जन्मदिवसस्य पावनावसरे वैदिकानां, आध्यात्मिकानां, पर्यावरणसम्बद्धानां च विविधकार्यक्रमाणाम् आयोजनं श्रद्धया उत्साहेन च सम्पन्नम्। कार्यक्रमस्य शुभारम्भः वैदिकपरम्परानुसारं गुरुपूजनेन अभवत्।
अस्मिन् पावने अवसरे विश्वविद्यालयस्य कुलगुरोः प्रो. (डॉ.) नरेशकुमारतिवारी-महोदयस्य मार्गदर्शने सान्निध्ये च सर्वप्रथमं गुरुपूजनं सम्पन्नम्। विश्वविद्यालयस्य उन्नत्यै कुलाधिपतिमहोदयस्य च दीर्घायुः, आरोग्यं, मंगलमयं च जीवनं कामयमानैः बृजेशकुमारमिश्रमहोदयस्य संचालनान्तर्गतं हनुमानचालीसाया एकादशवारम् अखण्डपाठः सम्पन्नः। अस्मिन् आध्यात्मिके कार्यक्रमे विश्वविद्यालयस्य कुलसचिवः श्रीसन्दीपशर्मा, प्राध्यापकाः, सहायकप्राध्यापकाः, अशैक्षणिक-कर्मचारिणः, द्विशताधिकाः छात्राः छात्राश्च श्रद्धया सहभागितां कृतवन्तः।
तदनन्तरं डॉ. आजादसिंहः, डॉ. आलोकचन्द्रपरिडा महोदययो संचालनान्तर्गतं वृक्षारोपणकार्यक्रमः आयोजितः। कुलाधिपतिमहोदयस्य जन्मदिवसः पर्यावरणसंरक्षणेन सह सम्बद्ध्य विश्वविद्यालयपरिसरे "एकः वृक्षः मातृनाम्ना" इति अभियानस्य अन्तर्गतं एकविंशतिः फलवृक्षाः रोपिताः। अस्मिन् अवसरे कुलगुरुः, कुलसचिवः, आमन्त्रिताः अतिथयः, शिक्षकसमुदायः, अशैक्षणिककर्मचारिणः, छात्राः छात्राश्च वृक्षारोपणं कृत्वा पर्यावरणसंरक्षणस्य संकल्पं स्वीकृतवन्तः।
कार्यक्रमे सर्वप्रथमम् अतिथीनां विदुषां च स्वागतं कृतम्। वैदिकाचार्यैः वैदिकमन्त्राणां सस्वरपाठेन सह विभागाध्यक्षैः अतिथीनां पारम्परिकरीत्या तिलकेन, माल्यार्पणेन, वस्त्रेण, श्रीफलेन तथा स्मृतिचिह्नप्रदानेन च अभिनन्दनं कृतम्। अतिथीनां स्वागताभिनन्दनयोः अनन्तरं विश्वविद्यालयस्य कुलसचिवेन सन्दीपशर्मवर्येण स्वागतभाषणं प्रस्तुतम्। तेन कुलाधिपतेः ब्रह्मचारिणः गिरीशमहोदयस्य जन्मदिवसः विश्वविद्यालयपरिवारस्य कृते प्रेरणादायकः गौरवपूर्णश्च अवसरः इति प्रतिपाद्य सर्वेषाम् अतिथीनां, शिक्षकाणां, कर्मचारिणां, विद्यार्थिनां च स्वागतं कृतम्। कार्यक्रमस्य मुख्यातिथिना गोविज्ञानानुसन्धानकेन्द्रस्य, देवलापुरस्य, नागपुरस्य सुनीलमानसिंहका-महोदयेन स्वीयोद्बोधने भारतीयज्ञानपरम्परायाः, वैदिकचिन्तनस्य, गोविज्ञानस्य च महत्त्वे प्रकाशः स्थापितः। तेन कुलाधिपतेः ब्रह्मचारिणः गिरीशमहोदयस्य जन्मदिवसावसरे हार्दिकाः शुभकामनाः अपि प्रेषिताः। सारस्वतवक्ता जितेन्द्रभकने-महोदयेन पर्यावरणस्य गोमातुः च रक्षणसंरक्षणयोः विषये जनाः प्रेरिताः। तेन कुलाधिपतिमहोदयस्य जन्मदिवसावसरे शुभकामनाः प्रदाय भारतीयसंस्कृतेः, वैदिकपरम्परायाः, विश्वविद्यालयस्य उद्देश्यानां च प्रशंसा कृता।
कार्यक्रमस्य अध्यक्षतां कुर्वता विश्वविद्यालयस्य कुलगुरुणा प्रो. (डॉ.) नरेशकुमारतिवारी-महोदयेन अध्यक्षीयोद्बोधने उक्तं यत् कुलाधिपतेः ब्रह्मचारिणः गिरीशमहोदयस्य जीवनं भारतीयज्ञानपरम्परायै, गुरुशिष्यपरम्परायै, मानवकल्याणभावनायै च समर्पितम् अस्ति। तेन विद्यार्थिभ्यः वैदिकमूल्यानि स्वजीवने आत्मसात्कर्तुं राष्ट्रस्य समाजस्य च प्रति स्वकीयदायित्वं निर्वोढुं च सन्देशः प्रदत्तः। कुलगुरुमहोदयेन स्वीयोद्बोधने उक्तं यत् गवि गोमूत्रे च अनेकानां रोगाणां निवारणस्य शक्तिः निहिता अस्ति। अस्य कृते अस्माभिः कतिपयानि सरलानि सहजोपायानि स्वजीवने स्वीकरणीयानि। भारतीयसंस्कृतौ गोमातुः महत्त्वं प्रतिपादयन् तेन उक्तं यत् यदि वयं श्रद्धया गोमातरं प्रणमामः, तर्हि तत् समस्तदेवताभ्यः प्रणामकरणस्य समतुल्यम् अस्ति। गोमाता अस्माकं सनातनसंस्कृतेः जीवनपद्धतेश्च महत्त्वपूर्णः आधारः अस्ति।
कुलगुरुमहोदयेन नैतिकताविषये उक्तं यत् अस्माकं भयम् अन्येभ्यः न, अपि तु अनैतिकतायाः भवितव्यम्। अतः प्रत्येकः व्यक्तिः स्वजीवने नैतिकमूल्यानि, सदाचारं, संस्कारांश्च स्वीकरिष्यामि इति संकल्पं कुर्यात्। अस्मिन् अवसरे कुलगुरुमहोदयेन सह उपस्थितैः सर्वैः जनैः संकल्पः कृतः यत् गणेशोत्सवे दीपावल्यां च गोमयेन निर्मितानां दीपानां अधिकाधिकं प्रयोगः करिष्यते। अनेन भारतीयपरम्परायाः, पर्यावरणसंरक्षणस्य, स्वदेशीजीवनपद्धतेश्च प्रोत्साहनस्य सन्देशः प्रदत्तः।
कार्यक्रमस्य अन्ते महर्षिवेदविज्ञानविद्यापीठस्य प्रभारी अरविन्दसिंहमहोदयेन कृतज्ञताज्ञापनं धन्यवादज्ञापनं च प्रस्तुतम्। तेन सर्वेषाम् अतिथीनां, कुलगुरोः, कुलसचिवस्य, शिक्षकाणां, कर्मचारिणां, विद्यार्थिनां च प्रति कृतज्ञता व्यक्ता। तदनन्तरं वैदिकाचार्यैः शान्तिपाठः कारितः तथा कार्यक्रमस्य समापनस्य घोषणा कृता।अस्मिन् कार्यक्रमे सहस्राधिकप्रतिभागिनः सहभागिताम् अकुर्वन् इति शम्।

# शैक्षणिकस्पर्धासु छात्राः प्रदर्शितवन्तः स्वसामर्थ्यम्

## सुभाषितकण्ठपाठ-भाषणप्रतियोगितासु स्वीकृतवन्तः भागम्; प्रथमाः छात्राः पुरस्कृताः



दरभङ्गा। राघव नाथ झा। कामेश्वरसिंह-दरभङ्गा-संस्कृतविश्वविद्यालयस्य स्नातकोत्तरविभागस्य सभागारे आयोजिते संस्कृतसप्ताहकार्यक्रमे तृतीये दिवसे गुरुवासरे विद्यालयीयाः उच्चस्तरीयच्छात्राश्च विविधासु शैक्षणिकस्पर्धासु भागं गृहीत्वा स्वसामर्थ्यं प्रदर्शितवन्तः। छात्राणां प्रस्तुतिभिः निर्णायकमण्डलस्य सदस्याः अतीव प्रसन्नाः अभवन्, उत्कृष्टाः छात्राश्च पुरस्कृताः जाताः।
एतां सूचनां प्रयच्छन् जनसम्पर्काधिकारी (PRO) डॉ. निशिकान्तः अवदत् यत् विद्यालयस्तरीयच्छात्राणां मध्ये आयोजितायां सुभाषितकण्ठपाठस्पर्धायां दरभङ्गा-जूनियर-पब्लिक-विद्यालयस्य तेजसकुमारझाः प्रथमम्, द-फाउण्डेशन-अकादमी-संस्थायाः वैभवकुमारः द्वितीयम्, तथा च पब्लिक-स्कूल-दरभङ्गा-संस्थायाः काव्या तृतीयं स्थानम् अलभत।
एवमेव 'संस्कृतभाषायाः महत्त्वम्' इति विषये आयोजितायां विद्यालयस्तरीयभाषणस्पर्धायां ज्ञानभारती-पब्लिक-विद्यालयस्य सर्वोत्तमकुमारझाः प्रथमम्, दरभङ्गा-जूनियर-पब्लिक-विद्यालयस्य नैवेद्या शास्त्री द्वितीयम्, तथा च द-फाउण्डेशन-अकादमी-संस्थायाः जया कुमारी तृतीयं स्थानं प्राप्तवती।
अपरञ्च 'संस्कृतक्षेत्रे उद्यमितायाः अवसराः' इति विषये आयोजितायाम् उच्चस्तरीयभाषणप्रतियोगितायां म.अ. रमेश्वरलता-संस्कृतमहाविद्यालयस्य सर्वज्ञा कुमारी प्रथमम्, अस्यैव महाविद्यालयस्य सुप्रीता कुमारी द्वितीयम्, तथा च नन्दन-संस्कृतमहाविद्यालयः, ईसहपुरं (मधुबनी) इत्यस्य महेशकुमारझाः तृतीयं स्थानं प्राप्तवान्।
प्रभारिकुलपतेः प्रो. दिलीपकुमारझा-महोदयस्य अध्यक्षत्वे आयोजिते अस्मिन् कार्यक्रमे चन्द्रधारी-मिथिला-महाविद्यालयस्य संस्कृतविभागाध्यक्षः डॉ. संजीतकुमारझा-महोदयाः विशिष्टातिथिरूपेण उपस्थिताः आसन्। तेऽपि छात्रान् प्रोत्साहयन्तः संस्कृतस्य महत्त्वे सविस्तरं प्रकाशम् अपातयन्। संस्कृतविश्वविद्यालयस्य सी.सी.डी.सी. डॉ. शिवलोचनझा-महोदयस्य अपि विशिष्टोपस्थितिः आसीत्।सत्रस्य अध्यक्षः संकायप्रमुखः (डीन) प्रो. पुरेन्द्रवारिकः, संयोजकः डॉ. वरुणकुमारझाः, सञ्चालकश्च सहायकप्राचार्यः डॉ. शम्भुशरणतिवारी आसीत्।
निर्णायकमण्डलस्य सदस्येषु डॉ. ममता पाण्डेय, डॉ. संजीतकुमारझाः, डॉ. छविलालन्यौपाने, डॉ. रामनिहोरा रायः, डॉ. मुरारीकुमारमिश्रः, डॉ. सीताचरणझाः, डॉ. घनश्याममिश्रः, डॉ. शिवलोचनझाश्च सम्मिलिताः आसन्।

## बागपते जनपदीयाः संस्कृतगीत- सामान्य- ज्ञान- प्रतियोगिताः सम्पन्नाः



**हिमसंस्कृतवार्ताः- बागपत, उत्तरप्रदेशः।**
उत्तरप्रदेश- संस्कृत- संस्थानम्, लखनऊ इत्यस्य तत्त्वावधाने बृहस्पतिवासरे ग्वालीखेड़ास्थिते श्रीदादू- बलराम- संस्कृत- महाविद्यालये जनपदस्तरीययोः संस्कृतगीतप्रतियोगितायाः संस्कृत- सामान्यज्ञान- प्रतियोगितायाश्च आयोजनं सम्पन्नम्। प्रतियोगितायां जनपदस्य सप्तविद्यालयेभ्यः आगताः त्रिंशत् छात्राः उत्साहपूर्वकं सहभागितां कृतवन्तः। प्रतियोगितायां षष्ठीकक्षातः द्वादशकक्षापर्यन्तं छात्राः सम्मिलिताः। संस्कृत- सामान्यज्ञान- प्रतियोगितायां षोडश छात्राः, संस्कृतगीत- प्रतियोगितायां च चतुर्दश छात्राः सहभागितां कृतवन्तः। छात्रैः संस्कृतसामान्यज्ञानसम्बद्धानां प्रश्नानाम् उत्तराणि प्रदत्तानि तथा संस्कृते गीतानि प्रस्तुतानि।
प्रतियोगितायां ग्वालीखेड़ास्थितं दुर्गेश्वरीदेवी- संस्कृत- विद्यालयम्, श्रीदादू- बलराम- संस्कृत- महाविद्यालयः, बालेनीस्थितः सर्वोदयसंस्कृताश्रमः, बरनावास्थितः श्रीमहानन्दसंस्कृतविद्यालयः, अमीनगरसरायस्थितः आचार्य- जयसागर- दिगम्बरजैन- इण्टरकॉलेजः, फुलेरास्थितः श्रीनेहरूस्मारक- इण्टरकॉलेजः, खेकड़ास्थितः एम. एम. इण्टरकॉलेजः इत्येते विद्यालयाः सहभागिनः आसन्।

**सामान्यज्ञानप्रतियोगितायां आयुषः प्रथमस्थानम्**
संस्कृत- सामान्यज्ञान- प्रतियोगितायां बरनावास्थितस्य आयुषजैनस्य प्रथमस्थानं, दिव्यांशस्य द्वितीयस्थानं तथा ग्वालीखेड़ास्थितस्य दुर्गेश्वरीदेवी- संस्कृत- विद्यालयस्य मयंकस्य तृतीयस्थानं प्राप्तम्। वंशः, निखिलः तथा प्रशान्तत्यागी सान्त्वनापुरस्काराय चयनिताः।

**संस्कृतगीतप्रतियोगितायां हिमांशुः प्रथमः**
संस्कृतगीतप्रतियोगितायां ग्वालीखेड़ास्थितस्य दुर्गेश्वरीदेवीसंस्कृतविद्यालयस्य हिमांशोः प्रथमस्थानं, नैतिकपालस्य द्वितीयस्थानं तथा रजतस्य तृतीयस्थानं प्राप्तम्। अविचलः, लुक्सः तथा अंशः सान्त्वनापुरस्काराय चयनिताः।
प्रतियोगितायाः निर्णायकमण्डले आदर्श- इण्टरकॉलेज- सिनौलीस्य संस्कृतप्रवक्ता डॉ. अरविन्दकुमारतिवारी, बिल्वेश्वर- संस्कृत- महाविद्यालय- मेरठस्य संस्कृतप्रवक्ता रविकान्तशर्मा, नेहरूस्मारक- इण्टरकॉलेज- फुलेरायाः संस्कृतप्रवक्ता रोहितकुमारसिंहः तथा एम. एम. इण्टरकॉलेज- खेकड़ायाः संस्कृतप्रवक्ता उमेशशर्मा आसन्।
महाविद्यालयस्य प्रबन्धकः महन्तः डॉ. साधुरामस्वामी विजेतृछात्रेभ्यः स्मृतिचिह्नानि प्रमाणपत्राणि च प्रदाय तेषाम् उत्साहवर्धनं कृतवान्। अस्मिन् अवसरे प्रधानाचार्यः सुरेन्द्रशास्त्री, विवेकशर्मा, सुबोधधामा, जयदेवः, अभिषेकः, शिवमशर्मा, मीनाक्षी, लक्ष्मी तथा जगनशास्त्री इत्यादयः गणमान्याः उपस्थिताः आसन्। प्रतियोगितायाः माध्यमेन छात्रेषु संस्कृतभाषायाः, संस्कृतगीतस्य तथा भारतीयज्ञानपरम्परायाः प्रति उत्साहः वर्धितः।

## वेदप्रचारसप्ताहस्य तृतीयदिवसे वेदमन्त्रोच्चारण- प्रतियोगिता सम्पन्ना






**हिमसंस्कृतवार्ताः- डा.विमलेश झा, भागलपुर, बिहार**

बिहारराज्यस्य डीएवी- पब्लिक- स्कूलबरारी- भागलपुरविद्यालयस्य, परिसरे आयोज्यमानस्य वेदप्रचारसप्ताहस्य तृतीयदिवसे विशेषप्रार्थनासभायाः आयोजनम् अभवत्। अस्यां सभायां छात्राः मधुरस्वरेण "सुरससुबोधा विश्वमनोज्ञा" इति संस्कृतगीतं प्रस्तुतवन्तः। तेन सम्पूर्णं वातावरणं भक्तिमयं आध्यात्मिकमयं च अभवत्। तदनन्तरं विद्यालयस्य हिन्दीशिक्षिका श्रीमती रागिनी दूबेमहोदया स्वसम्बोधने उक्तवती यत् वेदाः अस्माकं ज्ञाननिधयः सन्ति। वेदेषु निहितं ज्ञानं मानवजीवनाय सदैव मार्गदर्शकं भवति। वेदप्रचारसप्ताहस्य तृतीयदिवसे वेदमन्त्रोच्चारणप्रतियोगितायां विद्यालयस्य चतुर्णां सदनानां छात्राः उत्साहपूर्वकं भागं गृहीतवन्तः। प्रत्येकं समूहे दश छात्राः भागं स्वीकृत्य शुद्धोच्चारणेन, स्वरलयसामञ्जस्येन च वैदिकमन्त्राणाम् उच्चारणं कृत्वा स्वप्रतिभायाः उत्कृष्टं प्रदर्शनं कृतवन्तः। प्रतियोगितायाः निर्णायकमण्डले विद्यालयस्य शिक्षकाः श्रीमती मुक्ता वर्मा, आशीषकुमारदासः डॉ. विमलेश झा च आसन्। अवसरेऽस्मिन् विद्यालयस्य प्राचार्यः सह सहायकक्षेत्रीयाधिकारी च श्री अनिलकुमारमहोदयः स्वसम्बोधने उक्तवान्- "वेदमन्त्राणां माध्यमेन वयं न केवलम् आध्यात्मिकशान्तिं प्राप्नुमः, अपि तु एते शारीरिक-मानसिकस्वास्थ्यस्य कृतेऽपि उपयोगिनः सन्ति। अस्माभिः प्रतिदिनं मन्त्रोच्चारणं करणीयम्।" इति। कार्यक्रमस्य सफलसञ्चालने विद्यालयस्य समस्तशिक्षकशिक्षिकाणां शिक्षकेतर- कर्मचारिणां च योगदानं प्रशंसनीयम् आसीत्।

## वृक्षसंरक्षणेन एव पृथिव्याः प्रकृतेश्च रक्षणं सम्भवम्- डॉ. गंगवार



**हिमसंस्कृतवार्ताः- सौरभः दे**

डीपीएस बोकारो विद्यालये वृक्षेभ्यः रक्षासूत्रं बध्वा छात्रैः शिक्षकैश्च पर्यावरणसंरक्षणस्य संकल्पः कृतः
बोकारो। भ्रातृभगिन्योः पवित्रप्रेम्णः, परस्पर- सुरक्षायाः, विश्वासस्य प्रतीकरूपं रक्षाबन्धनपर्व दिल्ली- पब्लिक- स्कूल (डीपीएस), बोकारो इत्यत्र पुनरपि दूरदर्शितया तथा पर्यावरणचेतनया विशिष्टरीत्या आचरितम्। पारम्परिकपरिधिमतिक्रम्य विद्यालयपरिसरे गुरुवासरे वृक्षबन्धनस्य मैत्रीबन्धनस्य च कार्यक्रमः आयोजितः। अस्मिन् कार्यक्रमे छात्रैः शिक्षकैश्च प्रकृतेः प्रहरीभूतानां वृक्षाणां रक्षणार्थं तेषां स्कन्धेषु रक्षासूत्राणि बध्वा तेषां संरक्षणस्य संकल्पः कृतः। विद्यालयस्य प्राचार्यस्य डॉ. ए. एस. गंगवारस्य नेतृत्वे वरिष्ठशिक्षकैः, वरिष्ठप्रशासनिकाधिकारिभिः छात्रैश्च वरिष्ठवर्गस्य प्राङ्गणे वृक्षेषु विशालानि कलात्मकानि रक्षासूत्राणि बद्धानि तथा तेषां संरक्षणस्य प्रतिज्ञा कृता। तत्रैव प्राथमिकविभागस्य बालछात्रछात्राभिः स्वहस्तनिर्मितानि विविधवर्णयुक्तानि रक्षासूत्राणि वृक्षेषु सज्जीकृत्य "वृक्षान् रक्षामः, पृथिवीं रक्षामः" इति प्रेरणादायकः सन्देशः प्रदत्तः। प्री-नर्सरीतः पञ्चमकक्षां यावत् छात्रैः कलानिर्माण-गतिविध्यन्तर्गतं स्वयमेव रक्षासूत्राणि निर्मितानि। तानि रक्षासूत्राणि सहपाठिनां कलायां बध्वा छात्रैः परस्परं सौहार्दस्य, समरसतायाः मैत्रीभावस्य च अभिव्यक्तिः कृता।
प्राचार्यः डॉ. गंगवारः सर्वेभ्यः रक्षाबन्धनपर्वणः शुभकामनाः प्रदाय अवदत् यत् रक्षाबन्धनपर्व भ्रातृभगिन्योः मध्ये प्रेम्णः, स्नेहस्य, सुरक्षायाः उत्तरदायित्वस्य च अखण्डबन्धनस्य प्रतीकम् अस्ति। प्रकृतिसंरक्षणस्य विषये जनजागरूकतां वर्धयितुं वृक्षबन्धन-मैत्रीबन्धनादीनां कार्यक्रमाणां महत्त्वं प्रतिपादयन् सः अवदत्—"वृक्षाः एव धरायाः वास्तविकानि आभूषणानि सन्ति। अधिकाधिकं वृक्षारोपणं तेषां संरक्षणं च कृत्वा एव वयं पर्यावरणस्य रक्षणं कर्तुं शक्नुमः।"
नेपालदेशे जाता इव प्राकृतिकविपदाः अधिकाधिक- वृक्षारोपणेन एव न्यूनीकर्तुं शक्यन्ते इति अपि सः अवदत्। छात्रछात्राभ्यः अस्मिन् दिशि उत्साहपूर्वकं सक्रियभागग्रहणाय सः आह्वानं कृतवान्।



# कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालये भारतीय- ज्ञान- परम्पराधारित- लेखन- परियोजनायाः लेखकानां सम्मेलनं सम्पन्नम्





**हिमसंस्कृतवार्ताः- डॉ रेणुका बोकारे, नागपुरम्।**

कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालयस्य भारतीयज्ञानपरम्परा-केन्द्रं ज्ञान- जिज्ञासायाः विविधपरियोजनानां च एकम् ऊर्जस्वि केन्द्रम् अस्ति। महाराष्ट्रशासनेन राष्ट्रिय- शिक्षा- नीतिः- २०२० पूर्णतः स्वीकृता अस्ति तथा तस्याः प्रचार- प्रसारस्य कार्यं व्यापकस्तरे क्रियमाणम् अस्ति। अस्मिन् विभिन्नविषयाणां माध्यमेन भारतीयज्ञानपरम्परायाः अपि समावेशः कृतः अस्ति। प्राचीनभारतीयज्ञानस्य, शास्त्राणां, संस्कृतेः, परम्पराणां च परिचयं नूतन- जेनरेशन-जेड्-सन्ततिं प्रति प्रापयितुम् अस्य प्रयासस्य मूलोद्देश्यम् अस्ति। महाराष्ट्रशासनेन अस्य नियमितरूपेण अवलोकनं क्रियते। तदतिरिक्तं माननीय- राज्यपाल- कार्यालयेन अपि अस्मिन् विषये विशेषरुचिं स्वीकृत्य भारतीयज्ञानपरम्परामाधारितानां पञ्चम्याः कक्ष्यातः द्वादश्याः कक्ष्यापर्यन्तं विद्यार्थिनां कृते पाठ्यपुस्तकानां निर्माणस्य दायित्वं कविकुलगुरु- कालिदास- संस्कृत-विश्वविद्यालयाय समर्पितम् अस्ति। भारतसर्वकारस्य शिक्षामन्त्रालयस्य अन्तर्गतं भारतीयज्ञानपरम्पराविभागः (IKS) इत्यस्य माध्यमेन विश्वविद्यालयाय भारतीय- ज्ञानपरम्परा- केन्द्रं प्राप्तम् अस्ति। अस्य केन्द्रस्य समन्वयिका, भारतीयधर्म- दर्शन- संस्कृति- संकायस्य च अधिष्ठात्री प्रो. कलापिनी अगस्ती-महोदयायाः मार्गदर्शने पञ्चम्याः कक्ष्यातः द्वादश्याः कक्ष्यापर्यन्तं भारतीयज्ञानपरम्पराधारितानां पाठ्यपुस्तकानां निर्माणकार्यं प्रचलति। एतेषां पाठ्यपुस्तकानां लेखने महाराष्ट्रस्य कुलं २६ विद्वांसः अध्ययनशीलाश्च लेखकाः योगदानं ददति। अस्य लेखकसमूहस्य कतिपयस्य सदस्यस्य सम्मेलनम् अधुना एव रामटेकनगरे आयोजितम्। भारतीयसंस्कृतिः, पर्वोत्सवाः, उत्सवाः, मन्दिराणि, विविधाः कलाः, प्रादेशिकपरम्पराः, विभिन्नानि प्राचीनशास्त्राणि, कृषिः, स्थापत्यम्, विज्ञानम् इत्यादीन् अनेकान् विषयान् समावेश्य आकर्षकैः चित्रैः सुसज्जितानां सुन्दरपाठ्यपुस्तकानां निर्माणं कृतम् अस्ति। २६ सदस्यीयस्य लेखकसमूहस्य प्रवीणयोगी, मन्दारमोरोणे, मंगेशबावसे, सौ. मृण्मयी कुळकर्णी, डॉ. रेणुका करंदीकर, डॉ. सुमित कठाळे, सौ. मृणाल फडणवीस-झाडे, सौ. वीणा बावसे, प्रा. श्रद्धा देवपुजारी च इत्येते रामटेकपरिसरस्य भ्रमणं कृतवन्तः। तैः सह सम्पन्नायां चर्चायां प्रत्येकस्य लेखकस्य व्यक्तिगत- अध्ययनस्य, कार्यक्षेत्रस्य, अनुभवस्य च परिचयं प्राप्तुं अवसरः प्राप्तः, ज्ञानमार्गस्य एतेषां साधकानां कार्यस्य व्यापकता महत्ता च प्रकाशिता। प्रवीणयोगिना रायगढदुर्गस्य प्रायः ८० वारं यात्रां कृत्वा तस्य इतिहासस्य दुर्गस्य प्रत्येकस्य भागस्य च सूक्ष्मज्ञानस्य अध्ययनं कृतमिति उल्लेखनीयम्। तेन शिवकालीनदुर्गाणां तथा विभिन्नमन्दिराणां मूर्तीनां इतिहासस्य अतिरिक्तं अस्मिन् विषये कार्यं कुर्वतां वैश्विकविदुषां योगदानं शोधकार्यं च अत्यन्तं सहजया सरलया च भाषया प्रस्तुतम्। नाट्यं, पत्रकारिता, लेखनं निर्देशनं चेति विविधेषु क्षेत्रेषु सक्रियौ श्रीमंगेशबावसे तथा सौ. वीणा बावसे-दम्पती अपि स्वजीवनस्य कार्ययात्रायाः च अनुभवाः साझा कृतवन्तौ। महाराष्ट्रटाइम्स- पत्रकारः मन्दारमोरोणे, डॉ. सुमितकठाळे, सौ. मृण्मयीकुळकर्णी, सौ. मृणालझाडे, डॉ. रेणुकाकरंदीकर, प्रा. श्रद्धादेवपुजारी इत्येतेऽपि स्वस्वकार्य क्षेत्रस्य अनुभवस्य च विषये सूचनाः प्रदत्तवन्तः। भारतीयज्ञानपरम्परा-केन्द्रस्य सह-समन्वयकः प्रो. हरेकृष्ण अगस्ती उक्तवान् यत् विश्वविद्यालयेन विद्यालयीन-पाठ्यपुस्तकानां निर्माणस्य माध्यमेन भारतीयज्ञानपरम्परायाः क्षेत्रे यत् महत्त्वपूर्णं योगदानं दीयते, तत् अधुना सम्पूर्णमहाराष्ट्रस्य विद्यार्थिभ्यः शिक्षकेभ्यश्च प्राप्स्यति, इति अत्यन्तं हर्षस्य सन्तोषस्य च विषयः अस्ति। प्रो. कलापिनी अगस्ती भारतीय- ज्ञानपरम्परा- केन्द्रेण पूर्णीकृतानां दार्शनिकहस्तलिखितग्रन्थानां सूचीसम्बद्धानाम् अष्टखण्डानां प्रकाशनस्य सूचनां दत्त्वा एतान् खण्डान् सम्बन्धितान् हस्तलिखितग्रन्थांश्च प्रत्यक्षरूपेण प्रदर्शितवती। तया उक्तं यत् केन्द्रस्य पक्षतः हस्तमुद्रासु आधारितं शोधकार्यं, भारतीय- ज्ञान- सम्पदाम् आधारितानां विभिन्नशास्त्रसम्बद्धानां ग्रन्थानां निर्माणपरियोजनाः अपि सञ्चाल्यन्ते। एते सर्वे ग्रन्थाः संस्कृत- हिन्दी- मराठी- इत्यादिषु भारतीयभाषासु उपलब्धाः करिष्यन्ते। पञ्चम्याः कक्ष्यातः द्वादश्याः कक्ष्यापर्यन्तम् एतेषां पाठ्यपुस्तकानां संस्कृत-हिन्दीभाषयोः अनुवादः अपि क्रियते, येन एतानि राष्ट्रियस्तरे उपलब्धानि कर्तुं शक्येरन्। सर्वेभ्यः लेखकेभ्यः तेषां महत्त्वपूर्णयोगदानाय धन्यवादः प्रदत्तः तथा आगामी- नूतनपरियोजनानां विषयेऽपि चर्चा कृता। अस्मिन् अवसरे सर्वेषां लेखकानां सम्मानः अपि कृतः। अस्मिन् अवसरे भारतीयज्ञानपरम्पराकेन्द्रस्य सह- समन्वयिका डॉ. रेणुका बोकारे, पाठ्यपुस्तकेभ्यः आकर्षकचित्राणि निर्मातुं कार्यं कृतवान् हिमांशूपानतावणे, वीडियो-निर्माणकार्यं कृतवान् ब्रिजेशसोमकुवरः अपि विशेषरूपेण उपस्थिताः आसन्।

# ईशान्यभारते श्रीजगन्नाथसंस्कृतेः ऐतिहासिकान्वेषणम्- विशेषतः मणिपुरस्य सन्दर्भे"द्विदिवसीयं राष्ट्रियसङ्गोष्ठीसमायोजनम्



**हिमसंस्कृतवार्ताः- इम्फाल, अगस्त २६।**

"ईशान्यभारते श्रीजगन्नाथसंस्कृतेः ऐतिहासिकान्वेषणम्- विशेषतः मणिपुरस्य सन्दर्भे" इति विषयमधिकृत्य भारतीय- ऐतिहासिक- अनुसन्धान-परिषदः (ICHR) प्रायोजितं द्विदिवसीयं राष्ट्रियसङ्गोष्ठीसमायोजनम् अगस्तमासस्य २५-२६ दिनाङ्कयोः इम्फाल्नगरे स्थिते Classic Grande इत्यत्र तथा च नम्बोलस्थे राधामाधव- आदर्श- संस्कृत- महाविद्यालये सम्पन्नम्। सङ्गोष्ठ्यामस्यां देशस्य विभिन्नेभ्यः भागेभ्यः विद्वांसः, अध्यापकाः, अनुसन्धानकर्तारः, छात्राश्च समुपस्थिताः। ईशान्यभारते, विशेषतः मणिपुरे, श्रीजगन्नाथपरम्परायाः ऐतिहासिकं, धार्मिकं, साहित्यिकं, सांस्कृतिकं च स्वरूपम् अस्यां सङ्गोष्ठ्यां विमर्शितम्। उद्घाटनसत्रे भारतस्य पूर्वशिक्षामन्त्री तथा पूर्वविदेशमन्त्री डॉ. आर. के. रञ्जनः मुख्यातिथिरूपेण उपस्थितः आसीत्। राधामाधव- आदर्श- संस्कृत- महाविद्यालयस्य शासीमण्डलस्य अध्यक्षः डॉ. पी. सनाजाओबा सिंहः सत्रस्य अध्यक्षतामकरोत्। भारतीय- ऐतिहासिक- अनुसन्धान- परिषदः, नवदिल्ली इत्यस्य प्रो. हरिहरपण्डा मुख्याभिभाषणम् अकरोत्। प्रो. हरेकृष्णशतपथी, राष्ट्रिय- संस्कृत- विश्वविद्यालयस्य, तिरुपतिः, पूर्वकुलपतिः तथा साहित्य- अकादमी- पुरस्कारप्राप्तः विद्वान्, सारस्वतातिथिरूपेण उपस्थितः आसीत्। प्रो. विजय दधीचः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदिल्ली, विशेष- आमन्त्रितरूपेण समुपस्थितः आसीत्। धनमञ्जुरीविश्वविद्यालयस्य कुलपतिः प्रो. वहेङ्गबम- चन्दबाबुसिंहः, मणिपुरविश्वविद्यालयस्य प्रो. इरोम गम्भीरसिंहः, ओडिया-विश्वविद्यालयस्य कुलपतिः प्रो. सत्यनारायण-आचार्यः च सम्मानितातिथिरूपेण समुपस्थिताः आसन्। स्वागतभाषणे राधामाधव- आदर्श- संस्कृत- महाविद्यालयस्य प्राचार्यः प्रो. बुद्धेश्वर-साराङ्गी सङ्गोष्ठ्याः महत्त्वं प्रकाशयन् अस्याः आयोजनस्य उद्देश्यान् विशदतया प्रतिपादितवान्। सङ्गोष्ठ्याः विशेषाकर्षणरूपेण डॉ. राहुल-शर्मणा तथा डॉ. रघु बी. राजेन सम्पादिता 'मणिप्रभा' इति पत्रिका विमोचिता। तदनन्तरं प्रवीण-एम. सज्जनेन, एच- सानायमा-सिंहेन च प्रणीता 'ईशावास्योपनिषद्- दर्शिका' इति पुस्तकमपि विमोचितम्। उभयोः प्रकाशनयोः उपस्थितैः विद्वद्भिः हर्षः व्यक्तः।

पूर्णसत्रे प्रो. हरेकृष्ण-शतपथिना सम्बोधनं कृतम्। अनन्तरं आयोजितेषु तान्त्रिकसत्रेषु एकविंशतितमे शताब्दे जगन्नाथपरम्परा, प्रादेशिकैकतायाः सेतुरूपेण जगन्नाथसंस्कृतिः, कला- साहित्य- वास्तुशास्त्रेषु जगन्नाथपरम्परा इत्यादयः विविधाः विषयाः विमर्शिताः। सङ्गोष्ठ्याः समापनसमारोहे पुरीस्थस्य SCS महाविद्यालयस्य संस्कृतविभागस्य पूर्वप्राध्यापकः प्रो. शारदा- सामन्तरायः मुख्यातिथिरूपेण उपस्थितः आसीत्। मणिपुर- विश्वविद्यालयस्य प्रो. इरोम गम्भीरसिंहः सम्मानितातिथिरूपेण समुपस्थितः आसीत्। अन्ते शान्तिमन्त्रपाठेन राष्ट्रियगानेन च कार्यक्रमस्य समापनम् अभवत्।

# बालिका-संस्कृत-विद्यापीठे रक्षाबन्धन-संस्कृतदिवसयोः भव्यः समारोहः





**हिमसंस्कृतवार्ताः- जगदीश डाभी**

बालिका- संस्कृत- विद्यापीठे रक्षाबन्धनस्य संस्कृतदिवसस्य च उत्सवः हर्षोल्लासेन उत्साहेन च आयोजितः। अस्मिन् कार्यक्रमे छात्राः छात्राश्च उत्साहपूर्वकं भागं गृहीतवन्तः। कार्यक्रमस्य मुख्योद्देश्यं विद्यार्थिनां भारतीयसंस्कृतेः, संस्काराणां, पारिवारिकमूल्यानां तथा संस्कृतभाषायाः महत्त्वस्य च परिचयं कराउनु आसीत्।

रक्षाबन्धनस्य पावने अवसरे छात्रैः स्वहस्तेन सुन्दराः राख्यः निर्मिताः। बालिकाः विविधैः रंगैः, सूत्रैः, मणिभिः, रिब्बनैः, कागदेन अन्यैः सजावटीद्रव्यैः च आकर्षकाः राख्यः निर्मितवत्यः। तासां रचनात्मकता सर्वेषां मनांसि आकर्षितवती। छात्राः स्वप्रतिभया कल्पनाशक्त्या च सुन्दराः राख्यः निर्मितवन्तः।

रक्षाबन्धनं भ्रातृभगिन्योः पवित्रप्रेमस्य, स्नेहस्य, विश्वासस्य च प्रतीकम् अस्ति। अस्मिन् दिने भगिनी भ्रातुः हस्ते रक्षासूत्रं बध्नाति तथा भ्राता भगिन्याः रक्षणस्य प्रतिज्ञां करोति। अयं पर्वः परिवारस्य एकतां प्रेमं च वर्धयति। विद्यालये संस्कृतदिवसः अपि हर्षेण आचरितः। विद्यार्थिभिः संस्कृतभाषायाः प्रति स्वप्रेमं प्रतिभां च प्रदर्शितम्। छात्रैः मधुरस्वरेण विविधाः संस्कृतश्लोकाः पठिताः। विद्यार्थिभिः संस्कृतगीतानि अपि सुमधुरस्वरेण गीतानि। तेषां प्रस्तुतिभिः विद्यालयस्य वातावरणं संस्कृतमयं जातम्।

संस्कृतभाषा भारतस्य प्राचीनतमा समृद्धा च भाषा अस्ति। अस्यां भाषायां वेदाः, उपनिषदः, रामायणम्, महाभारतम्, पुराणानि, भगवद्गीता च रचितानि सन्ति। संस्कृतभाषायां भारतीयज्ञानस्य, दर्शनस्य, साहित्यस्य, संस्कृतेः च विशालं भाण्डारम् अस्ति।

कार्यक्रमे संस्कृताध्यापकः दीपकशास्त्री महोदयः विद्यार्थिभ्यः संस्कृतभाषायाः महत्त्वं विस्तरेण अवदत्। सः अवदत् यत् संस्कृतभाषा केवलं प्राचीनभाषा नास्ति, अपितु भारतीयसंस्कृतेः ज्ञानपरम्परायाः च प्रमुखा आधारशिला अस्ति। संस्कृतस्य अध्ययनं विद्यार्थिनां स्मरणशक्तिं, उच्चारणशुद्धिं, एकाग्रतां तथा संस्कारान् वर्धयति। दीपकशास्त्रीमहोदयः विद्यार्थिनः संस्कृताध्ययने रुचिं वर्धयितुं प्रेरितवान्। सः अवदत् यत् संस्कृतभाषायाः प्रयोगः केवलं विद्यालये न भवेत्, अपितु छात्रैः दैनिकजीवने अपि सरलसंस्कृतशब्दानां वाक्यानां च प्रयोगः करणीयः। संस्कृतं ज्ञात्वा वयं भारतस्य गौरवशालीं ज्ञानपरम्परां सम्यक् अवगन्तुं शक्नुमः। विद्यालयस्य प्राचार्या सुमनशर्मा महोदया विद्यार्थिभ्यः रक्षाबन्धनस्य संस्कृतदिवसस्य च हार्दिकाः शुभकामनाः प्रदत्तवती। सा छात्राणां रचनात्मकतायाः, परिश्रमस्य, अनुशासनस्य च प्रशंसां कृतवती। सा अवदत् यत् विद्यालये आयोजिताः एतादृशाः कार्यक्रमाः विद्यार्थिनां सर्वाङ्गीणविकासे महत्त्वपूर्णां भूमिकां निर्वहन्ति।

प्राचार्या सुमनशर्मा महोदया अवदत् यत् अस्माकं पर्वाणि अस्माकं संस्कृतेः परिचायकानि सन्ति। एतेषां उत्सवानां माध्यमेन बालकाः भारतीयपरम्परां संस्कारान् च व्यवहाररूपेण ज्ञातुं शक्नुवन्ति। सा विद्यार्थिभ्यः परस्परं प्रेमं, भ्रातृत्वं, सहयोगं तथा ज्येष्ठानां सम्मानं च कर्तुं प्रेरणां दत्तवती।

अध्यापिका दिव्याशर्मा महोदया अपि विद्यार्थिभ्यः संस्कृतदिवसस्य महत्त्वं कथितवती। सा अवदत् यत् संस्कृतभाषा अस्माकं गौरवशालीसंस्कृतेः परिचयः अस्ति। विद्यार्थिभिः संस्कृतश्लोकानां, गीतानां, कथानां तथा साहित्यस्य अध्ययनं कृत्वा स्वज्ञानं वर्धनीयम्। अध्यापिका संगीताराणा महोदया विद्यार्थिनां उत्साहवर्धनं कृतवती। सा रक्षाबन्धनस्य महत्त्वं स्पष्टयन्ती अवदत् यत् रक्षासूत्रं भ्रातृभगिन्योः प्रेमस्य विश्वासस्य च प्रतीकम् अस्ति। सा विद्यार्थिभ्यः परस्परं साहाय्यं कर्तुं, प्रेम्णा व्यवहर्तुं, माता-पितॄन् गुरुजनान् च सम्मानयितुं च उपदेशं दत्तवती।

अङ्ग्लभाषायाः अध्यापिका मोनिकाशर्मा महोदया अपि विद्यार्थिनां प्रस्तुतिनां प्रशंसां कृतवती। सा अवदत् यत् शिक्षा केवलं पुस्तकेषु निहिता नास्ति। सांस्कृतिकाः, रचनात्मकाः तथा शैक्षिकाः गतिविधयः अपि विद्यार्थिनां व्यक्तित्वनिर्माणे महत्त्वपूर्णाः भवन्ति।कार्यक्रमे विद्यार्थिनः पूर्णोत्साहेन भागं गृहीतवन्तः। छात्रैः संस्कृतश्लोकाः पठिताः, संस्कृतगीतानि च गीतानि। तेषां मधुरस्वरैः सम्पूर्णः विद्यालयपरिसरः आनन्दमयः अभवत्। शिक्षकाः विद्यार्थिनां प्रस्तुतिभ्यः प्रसन्नाः अभवन् तथा तेषां उत्साहं वर्धितवन्तः। स्वहस्तनिर्मिताः राख्यः कार्यक्रमस्य विशेषाकर्षणम् आसन्। विद्यार्थिभिः सिद्धं कृतं यत् स्वल्पसाधनैः अपि सुन्दरवस्तूनि निर्मातुं शक्यन्ते। एतेन विद्यार्थिषु सृजनशीलता, आत्मनिर्भरता तथा पर्यावरणसंरक्षणस्य भावना अपि विकसिताः।

कार्यक्रमस्य माध्यमेन विद्यार्थिभ्यः भारतीयसंस्कृतेः, परम्पराणां, संस्काराणां तथा संस्कृतभाषायाः महत्त्वपूर्णः सन्देशः प्राप्तः। सर्वे शिक्षकाः विद्यार्थिनां उज्ज्वलभविष्यस्य कामनां कृतवन्तः। विद्यार्थिभ्यः निरन्तरं अध्ययनं कर्तुं, स्वप्रतिभां विकसितुं, संस्कृतभाषायाः प्रचारं प्रसारं च कर्तुं प्रेरणा दत्ता। अयं रक्षाबन्धन- संस्कृतदिवस- समारोहः विद्यार्थिनां कृते ज्ञानवर्धकः, प्रेरणादायकः आनन्ददायकश्च अभवत्। अस्य कार्यक्रमस्य माध्यमेन बालकाः स्वसंस्कृतेः संस्कारैः संस्कृतभाषया च सह अधिकं सम्बद्धाः अभवन्। अन्ते प्राचार्या सुमनशर्मा महोदया, दिव्याशर्मा महोदया, संगीताराणा महोदया, मोनिकाशर्मा महोदया, संस्कृताध्यापकः दीपकशास्त्रीमहोदयः विद्यार्थिभ्यः शुभाशीर्वादं प्रदत्तवन्तः। सर्वेषां सहयोगेन कार्यक्रमः सफलतया सम्पन्नः अभवत्। बालिका-संस्कृत-विद्यापीठस्य एषः समारोहः प्रेम्णः, संस्कारस्य, संस्कृतेः, रचनात्मकतायाः संस्कृतभाषायाः च सुन्दरं उदाहरणम् अभवत्। सर्वेषां हृदयेषु भारतीयसंस्कृतेः संस्कृतभाषायाः च प्रति गौरवभावना जागृता। कार्यक्रमः आनन्देन उत्साहेन च सम्पन्नः अभवत्।





# बाराबङ्क्याम् संस्कृत-प्रतिभान्वेषण- प्रतियोगितायां विद्यार्थिभिः प्रदर्शिता प्रतिभा

**हिमसंस्कृतवार्ताः- बाराबङ्की। उत्तरप्रदेशः।**

लखपेड़ाबागस्थिते पायनियर मांटेसरी इण्टर कॉलेज इत्यस्मिन् उत्तरप्रदेशसंस्कृतसंस्थानेन, लखनऊद्वारा आयोजितायाः संस्कृत- प्रतिभान्वेषण- प्रतियोगिता–२०२६ इत्यस्य जनपदस्तरीय- प्रतियोगितायाः भव्यः शुभारम्भः अभवत्। कार्यक्रमस्य प्रारम्भः विद्यालयस्य बालिकाभिः सरस्वतीपूजन-वन्दनेन तथा बालकैः भगवान् श्रीगणेशस्य वन्दनया अभवत्। विद्यालयस्य प्रधानाचार्या सुमनशुक्लया अतिथीनां हार्दिकं स्वागतं कृतम्।मुख्यातिथिः बेसिकशिक्षाधिकारी नवीनकुमारपाठकः, निर्णायकमण्डलस्य सदस्याः विनयशुक्लः, डॉ. गिरजाशङ्करः, डॉ. उमामौर्या एवं सीताकान्तस्वयंभू इत्येते दीपप्रज्वलनं कृत्वा कार्यक्रमस्य शुभारम्भं कृतवन्तः। जनपदसंयोजकः डॉ. रञ्जितकुमारवर्मा प्रतियोगितायाः उद्देश्यं, नियमांश्च प्रतिभागिभ्यः अवगतं कारयन् तान् उत्साहेन सहभागितायै प्रेरितवान्।संस्कृतसामान्य-ज्ञानप्रतियोगितायां नीतूसिंहः प्रथमस्थानं, पङ्खुड़ी द्वितीयस्थानं तथा लकी यादवः तृतीयस्थानं प्राप्तवन्तः। सांत्वनापुरस्काराय रिद्धिपटेलः, सत्यानन्द आजादः, आर्यासिंहः चयनिताः।संस्कृतगीत-प्रतियोगितायां प्रतिभागिभिः मधुरस्वरेण संस्कृतगीतानि प्रस्तुतानि। प्रतियोगितायां साक्षीयादवः प्रथमस्थानं, प्राप्तिसिंहः द्वितीयस्थानं तथा अञ्जलीमिश्रा तृतीयस्थानं प्राप्तवत्यः। अंशिकाकसौधनः, वन्दनाचौहानः, दिव्यागौण्डः सांत्वनापुरस्काराय चयनिताः।प्रतियोगितानां समापनानन्तरं पुरस्कार- वितरण- कार्यक्रमः अभवत्। विजेतृभ्यः प्रमाणपत्रैः पुरस्कारैश्च सम्मानः कृतः। आयोजकया प्रधानाचार्यया सुमनशुक्लया निर्णायकमण्डलस्य, अतिथीनां, जनपदसंयोजकस्य प्रति आभारः प्रकटितः। प्रतियोगितायां प्रथम-द्वितीय- तृतीयस्थानं प्राप्तवन्तः प्रतिभागिनः आगामी मण्डलस्तरीय- प्रतियोगितायां सहभागितां करिष्यन्ति। अनेन आयोजनने विद्यार्थिषु संस्कृतभाषायाः प्रति उत्साहः वर्धितः तथा स्वप्रतिभाप्रदर्शनाय तेषां महत्त्वपूर्णः अवसरः प्राप्तः।

# संस्कृतम्- सनातनं ज्ञानम्, नूतनं विज्ञानम् (संस्कृतदिवसोपलक्ष्ये विशेषः)




- प्रो. पायल-कँवर-चन्देलः
**विभागाध्यक्षा, संस्कृतविभागः, हरियाणा-केन्द्रीय- विश्वविद्यालयः, महेन्द्रगढम्।**

अद्य श्रावणपूर्णिमा अस्ति। अद्यैव महर्षिणा पाणिनिना स्वकीया विश्वप्रसिद्धा अष्टाध्यायी पूर्णतां नीता। अद्यैव ऋषिभिः वेदानां स्मरणं कृतम्, तस्मात् एषा तिथिः ऋषितर्पण-दिवसः इत्यपि कथ्यते। अद्य रक्षाबन्धनपर्व अस्ति, अद्यैव च संस्कृतदिवसः। अयं संयोगः अत्यन्तः पावनः। सः अस्मान् बोधयति यत् भाषा अपि एकं बन्धनम् अस्ति, एकं रक्षासूत्रम् अस्ति यत् अस्मान् अस्माकं सभ्यतया, संस्कृत्या, परम्परया च सह योजयति। यथा रक्षासूत्रं भगिनी भ्रातुः रक्षायै बध्नाति, तथैव संस्कृतभाषा अस्माकं ज्ञानस्य, संस्कृतेः, आत्मनः च रक्षां करोति। संस्कृतदिवसः केवलं पञ्चाङ्गस्य उत्सवः नास्ति, अयम् अस्माकम् आत्मनः उत्सवः अस्ति, अस्माकं चिन्तनस्य उत्सवः अस्ति। इयं भाषा यावत् प्राचीना तावत् नवीना अपि अस्ति। सहस्रवर्षेभ्यः पूर्वं या भाषा वेदेषु आसीत्, सैव अद्य संगणकेषु, कृत्रिम-बुद्धिमत्तायां, विश्वविद्यालयेषु च गुञ्जति। एतदेव संस्कृतस्य वैशिष्ट्यम्।जनाः प्रायः पृच्छन्ति- अद्यतनस्य विज्ञान- तन्त्रज्ञानयुगस्य संस्कृतस्य का प्रासंगिकता? एषः प्रश्नः स्वाभाविकः अस्ति, परन्तु तस्य उत्तरम् अत्यन्तं स्पष्टम् अस्ति- अस्मिन् युगे एव संस्कृतस्य सर्वाधिका प्रासंगिकता अस्ति। यदा विश्वं दिशाहीनतायाः संकटे अस्ति, यदा पर्यावरणस्य संकटम् अस्ति, यदा मनसः शान्तेः अभावः अस्ति, तदा संस्कृतम् एव अस्मभ्यं समाधानं दातुं शक्नोति।

संस्कृतम्- विश्वस्य वैज्ञानिकतमा भाषा अस्ति वयं भावनया संस्कृतं देववाणी इति वदामः, परं विश्वं तर्केण इमां वैज्ञानिकभाषा इति वदति। महर्षिणा पाणिनिना चतुःसहस्रसूत्रेषु यत् व्याकरणं रचितम्, तत् अद्यापि विश्वस्य लघुतमं, पूर्णतमं, संगणक-अनुकूलतमं व्याकरणम् अस्ति। पाणिनेः सूत्राणि गणितस्य सूत्राणि इव सन्ति। एकेन सूत्रेण अनेकानि रूपाणि सिद्ध्यन्ति। अष्टाध्याय्याः रचना एकः चमत्कारः एव अस्ति। विश्वप्रसिद्धः भाषावैज्ञानिकः Noam Chomsky अपि स्वीकृतवान् यत् पाणिनेः व्याकरणं आधुनिक- भाषाविज्ञानस्य प्रथमं रूपम् अस्ति। अमेरिकादेशस्य अन्तरिक्षसंस्था NASA इत्यस्य एकस्मिन् शोधपत्रे लिखितम् आसीत् यत् संस्कृतम् एव सा भाषा अस्ति या कृत्रिमबुद्धिमत्तायै सर्वाधिका उपयुक्ता अस्ति, यतः अस्याम् अस्पष्टता नास्ति। यदा वयं "गच्छति" इति वदामः, तदा एकस्मिन् एव शब्दे कर्ता प्रथमपुरुषः एकवचनम्, क्रिया गम्-धातुः, कालः वर्तमानकालः, इति सर्वं स्पष्टं भवति। आंग्लभाषायां "he goes" इति वदामः, द्वयोः शब्दयोः आवश्यकता भवति। संस्कृते एकस्मिन् पदे एव सम्पूर्णं वाक्यं भवितुम् अर्हति। एषा संक्षिप्तता स्पष्टता च अन्यस्यां भाषायां नास्ति। संस्कृतस्य वर्णमाला अपि वैज्ञानिकी अस्ति। कण्ठात् ओष्ठपर्यन्तं वर्णानां क्रमः ध्वनिशास्त्रस्य उत्तमम् उदाहरणम् अस्ति।

२. संस्कृतम्- भारतीयज्ञानविज्ञानस्य कुञ्जिका अस्माकं महती भ्रान्तिः भविष्यति यदि वयं संस्कृतं केवलं पूजापाठस्य भाषा इति मन्यामहे। संस्कृतं ज्ञानविज्ञानस्य महासागरः अस्ति, विश्वकोशः अस्ति।उक्तं च- किं तत् अस्ति यत् संस्कृते नास्ति? चिकित्साशास्त्रं पश्यतु। चरकसंहिता सुश्रुतसंहिता च अद्यापि आयुर्वेदस्य आधारग्रन्थौ स्तः। सुश्रुतः शल्यचिकित्सायाः जनकः इति कथ्यते। सः द्विसहस्रवर्षेभ्यः पूर्वम् एव नासिकायाः शल्यचिकित्सा, मोतियाबिन्दोः शल्यचिकित्सा च कथम् करणीया इति विस्तरेण लिखितवान्। गणितशास्त्रे आर्यभटः शून्यस्य आविष्कारं कृतवान्, भास्कराचार्यः बीजगणितस्य सिद्धान्तान् दत्तवान्। ज्योतिषशास्त्रे ग्रहाणां गतिः, ग्रहणस्य गणना च संस्कृते एव लिखिता अस्ति। प्रबन्धनशास्त्रं चेत् अपेक्षते तर्हि चाणक्यस्य अर्थशास्त्रं पश्यतु। राज्यं कथं चालयितव्यम्, अर्थव्यवस्था कथं स्थिरीकर्तव्या, इति सर्वं तत्र अस्ति। मनोविज्ञानं चेत् अपेक्षते तर्हि महर्षेः पतञ्जलेः योगसूत्रं पश्यतु। तत्र चित्तस्य स्वरूपं, वृत्तीनां प्रकाराः, क्लेशाः, तेषां निवारणोपायाः च अत्यन्तं वैज्ञानिकरूपेण वर्णिताः सन्ति। "योगश्चित्तवृत्तिनिरोधः" इति एकस्मिन् सूत्रे सम्पूर्णं मनोविज्ञानं समाहितम् अस्ति। आधुनिकः तनावः, अवसादः इत्यादीनां समाधानं योगसूत्रे अस्ति। अतः एव अद्य मनोविज्ञानस्य छात्राः अपि संस्कृतम् अवश्यं पठेयुः।

३. संस्कृतम्- भारतस्य वैश्विकः सन्देशःअद्य यदा भारतं विश्वमञ्चे तिष्ठति तदा किं वदति? सः वदति- "वसुधैव कुटुम्बकम्" इयं विश्वबन्धुत्वस्य भावना संस्कृतस्य देनम् अस्ति। सः वदति- "सत्यमेव जयते" इति सत्यस्य विजयस्य घोषणा अपि संस्कृते अस्ति। "योगः कर्मसु कौशलम्" इति कर्मयोगस्य सन्देशः अपि संस्कृते अस्ति। पर्यावरणस्य रक्षायै वयं वदामः- "माता भूमिः पुत्रोऽहं पृथिव्याः"। एषा भावना अथर्ववेदे अस्ति। विश्वशान्त्यै वयं वदामः- "सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः"। सर्वेषां सुखस्य कामना संस्कृतस्य संस्कृतिः अस्ति। "एकोऽहं बहु स्याम्" इति एकत्वे अपि विविधतायाः स्वीकारः संस्कृतस्य दर्शनम् अस्ति। इयं भाषा योजयितुं शिक्षयति, न तु भञ्जयितुम्। सा प्रेम्णः भाषा अस्ति, एकतायाः भाषा अस्ति।

४. संस्कृतस्य स्वर्णिमं भविष्यम्- निराशा नास्ति, आशायाः कालः अस्ति कतिपयवर्षेभ्यः पूर्वं केचन कथयन्ति स्म यत् संस्कृतं मृतभाषा अस्ति, लुप्यमाना भाषा अस्ति। परन्तु दृढविश्वासेन वक्तुं शक्यते यत् संस्कृतस्य द्वितीयं स्वर्णयुगं प्रारब्धम् अस्ति। एतत् आशायाः युगम् अस्ति।पूर्वं संस्कृतं केवलं गुरुकुलेषु, मन्दिरेषु च आसीत्, अद्य तत् IIT-संस्थासु, IIM-संस्थासु, AIIMS-संस्थासु चापि अस्ति। IIT-कानपुरे, IIT-रुड़की इत्यत्र संस्कृत-संगणकविज्ञानयोः विषये बृहन्तः शोधप्रकल्पाः प्रचलन्ति। जर्मनीदेशे चतुर्दशसु विश्वविद्यालयेषु, अमेरिकादेशे त्रिंशदधिकेषु विश्वविद्यालयेषु, इंग्लैण्डदेशे अपि अनेकेषु विश्वविद्यालयेषु संस्कृतविभागाः सन्ति।भारते नवीनशिक्षानीतिः २०२० एकं क्रान्तिकारी- परिवर्तनम् आनीतवती। सा कथयति यत् भारतीयज्ञानपरम्परा (IKS) सर्वेषु विषयेषु योजनीया। अस्य अर्थः अस्ति यत् अभियन्त्रणस्य छात्रः अपि सुश्रुतं पठिष्यति, मनोविज्ञानस्य छात्रः अपि वैदिकमन्त्रान् योगसूत्रं च पठिष्यति। एषा संस्कृताय महती विजयः अस्ति।अद्य ग्रामे ग्रामे संभाषणशिबिराणि भवन्ति। दशदिनेषु जनाः धाराप्रवाहेण संस्कृतं वदन्ति। सामाजिकमाध्यमेषु- YouTube, Instagram इत्यादिषु - सहस्रशः युवानः संस्कृतेन हास्यं, संगीतं, रैप-गीतं, लघु-चलच्चित्राणि च निर्मान्ति। संस्कृतेन उद्यमाः अपि प्रारब्धाः सन्ति। एका संस्था संस्कृतात् आंग्लभाषायाम् अनुवादार्थं कृत्रिमबुद्धिमत्तायाः उपकरणं निर्मातिं। एतत् सर्वं दर्शयति यत् संस्कृतं जीविता भाषा अस्ति, वर्धमाना भाषा अस्ति। अस्माकं संकल्पः अतः अस्मिन् पावने संस्कृतदिवसे वयं सर्वे मिलित्वा त्रयः लघुसंकल्पान् कुर्मः। एते संकल्पाः कठिनाः न सन्ति, परन्तु एतेषां प्रभावः महान् भविष्यति।

प्रथमः संकल्पः- प्रतिदिनं संस्कृतस्य एकं शब्दं, एकं वाक्यं वा जीवने प्रयुञ्ज्महे। यथा "सुप्रभातम्", "धन्यवादः", "कथम् अस्ति?" इति। द्वितीयः संकल्पः- वयं स्वबालकान्, स्वविद्यार्थिनः च भगवद्गीतायाः एकं श्लोकं सार्थं प्रतिदिनं पाठयामः। गीता जीवनस्य प्रबन्धनम् अस्ति। तृतीयः संकल्पः- वयं संस्कृतं अतीतस्य गौरवं न, अपि तु भविष्यस्य प्रौद्योगिकी, भविष्यस्य विज्ञानम् इति पश्यामः। तं दृष्टिकोणं परिवर्तयामः। यदि वयं एतान् त्रयः संकल्पान् करिष्यामः, तर्हि संस्कृतं केवलं ग्रन्थेषु न भविष्यति, अपि तु अस्माकं जिह्वायां, अस्माकं हृदये, अस्माकं जीवने च भविष्यति।

अन्ते वयं प्रार्थयामहे -अमृतं संस्कृतं मित्र, सरसं सरलं वचः।यः पठेत् सः भवेत् धन्यः, यः शृणोत् सः भवेत् सुखी॥

संस्कृतम् अमृततुल्यम् अस्ति, सरसम् अस्ति, सरलं च अस्ति। यः पठति सः धन्यः भवति, यः शृणोति सः सुखी भवति। आगच्छतु, इदम् अमृतं भावीसंततिभ्यः संरक्षामः, संवर्धयामः, विश्वाय च वितरामः।जयतु संस्कृतम्। जयतु भारतम्। जयतु ज्ञानम्। जयतु विज्ञानम्।

## नैमिषारण्ये संस्कृतसप्ताहे

### वादविवादेन दीप्तिमान् बटुकानां प्रतिभा

हिमसंस्कृतवार्ताः — उत्तरप्रदेशसंस्करणम्।

सीतापुरम्। संस्कृतभारती, सीतापुरस्य तत्त्वावधानेन नैमिषक्षेत्रस्थिते आत्मानन्दसंस्कृतशिक्षणसंस्थाने आयोजितस्य संस्कृतसप्ताहस्य अन्तर्गतं चतुर्थदिने रोचकः वादविवादप्रतियोगितायाः आयोजनम् अभवत्। प्रतियोगितायां संस्थानस्य बटुकाः उत्साहेन सहभागितां कृत्वा संस्कृते स्वविचारान् तर्कपूर्णतया प्रस्तुतवन्तः। प्रतियोगितायाः मार्गदर्शनं संस्थानस्य छात्रः आलोकः कृतवान्। तेन बटुकानां संस्कृतभाषायां स्पष्टतया, शुद्धोच्चारणेन प्रभावपूर्णतया च विचारप्रस्तुत्यै मार्गदर्शनं प्रदत्तम्। वादविवादस्य माध्यमेन छात्राणां आत्मविश्वासः, तर्कशक्तिः तथा संस्कृतभाषायाः सम्भाषणकौशलं च विकसितम्।संस्कृतभारत्याः कार्यकर्त्री अंशु गुप्ता अवदत् यत् संस्कृतसप्ताहस्य अन्तर्गतं प्रतिदिनं विविधाः गतिविधयः आयोज्यन्ते, येन बटुकानां संस्कृतभाषायां स्वाभाविकः अनुरागः जायते।



# 'लोकहितं मम करणीयम्' इत्यस्य स्वरेण गुञ्जितं विद्यालयपरिसरम्, संस्कृतसप्ताह-समारोहे प्रवृत्ता भारतीयसंस्कृतेः अविरलधारा




दरभङ्गा, सिंहवाड़ा,राघव नाथ झा हिमसंस्कृतवार्ता।

+२ उच्चमाध्यमिकविद्यालये भराठी-स्थाने आयोजितः संस्कृतसप्ताहसमारोहः वैदिकपरम्परया, सांस्कृतिकगरिमया, छात्राणां प्रतिभया च सह सोत्साहं सम्पन्नः अभवत्। समारोहस्य शुभारम्भः दीपप्रज्वालनेन, वैदिकमङ्गलाचरणेन, संस्कृतवन्दनया च जातः। कामेश्वरसिंह-दरभङ्गा-संस्कृतविश्वविद्यालयस्य व्याकरणाचार्यस्य, कार्यक्रमसंयोजकस्य, संस्कृतशिक्षकस्य डॉ. रिपुसूदनझा-महोदयस्य मार्गदर्शने सम्पूर्णे सप्ताहे विविधाः शैक्षणिकाः सांस्कृतिकाश्च कार्यक्रमाः आयोजिताः। समारोहस्य मुख्यम् आकर्षणं छात्रैः प्रस्तुतं "लोकहितं मम करणीयम्..." इति संस्कृतगीतं वर्तते स्म। एतेन सह "अनन्तं पुरातत्त्वम्", "संस्कृतधारा" तथा "भागीरथी वसु-समागमः" इत्यादीनि संस्कृतगीतानि, भजनानि, श्लोकपाठः, सांस्कृतिकाः प्रस्तुतयश्च विद्यालयपरिसरं संस्कृतमयं कृतवन्तः। अस्मिन् अवसरे विद्यालयस्य विभिन्नविषयाणां शिक्षकाः अपि संस्कृतस्य महत्त्वे स्वविचारान् प्रकटितवन्तः— अरुणकुमारः अवदत् यत् संस्कृतं भारतीयज्ञानविज्ञानस्य आधारभूता भाषा अस्ति। ओमप्रकाशमण्डलः संस्कृतं छात्रेषु संस्कारं अनुशासनं च विकासयित्री भाषा इति अकथयत्। तिलकरामः न्यवेदयत् यत् संस्कृतस्य अध्ययनेन भारतीयस्य इतिहासस्य, दर्शनस्य, संस्कृतेश्च अवगमनस्य अवसरः प्राप्यते।

* विजयकुमारसिंहः संस्कृतम् आधुनिकशिक्षया सह संयोज्य अग्रे नेतुं आवश्यकताम् अबोधयत्।

* फ़ैज़-अहमद-महोदयः भारतीयभाषाणां मध्ये संस्कृतस्य महत्त्वपूर्णां भूमिकां प्रतिपाद्य छात्रान् अस्याः अध्ययनाय प्रेरितवान्। नैन्सीकुमारी, ऐश्वर्या, साक्षी, खुशी, रत्ना, पीयूषः, आनन्दः इत्यादयः छात्राः गीतैः, श्लोकपाठेन, भाषणेन, सांस्कृतिकप्रस्तुतिभिः च स्वप्रतिभायाः प्रदर्शनम् अकुर्वन्। समापनावसरे डॉ. रिपुसूदनझा-महोदयः अवदत्— "संस्कृतं केवलम् एका भाषा नास्ति, अपि तु भारतस्य संस्कृतेः, ज्ञानस्य, दर्शनस्य, सभ्यतायाश्च अमूल्या धरोहरः अस्ति।" सः अकथयत् यत् संस्कृतं केवलम् एकः विषयः इति न मत्वा भारतीयज्ञानपरम्परायाः मूलाधाररूपेण अवगन्तव्यम्। सः छात्रान् संस्कृतस्य अध्ययनाय, संरक्षणाय, संवर्धनाय च अग्रे आगन्तुम् आह्वयत्। संस्कृतसप्ताहसमारोहः एतं सन्देशम् अददात् यत् संस्कृतं न कस्यापि एकस्य विषयस्य वा वर्गस्य सीमायां बद्धम्, अपि तु भारतीयज्ञानपरम्परया सम्बद्धस्य प्रत्येकजनस्य साझीया परम्परा अस्ति। शिक्षकाणाम् आशीर्वचनैः, छात्राणां प्रस्तुतिभिः, संस्कृतगीतानां मधुरस्वरलहरीभिः च समारोहः अविस्मरणीयः जातः।

# नौबतपुर-राघवेन्द्र-संस्कृतमहाविद्यालये 'संस्कृतस्य महत्त्वम्' इति विषये परिचर्चा, विद्यार्थिभिः गृहीतः भाषासंवर्धनस्य सङ्कल्पः

नौबतपुरम् राघव नाथ झा, हिमसंस्कृतवार्ता

नौबतपुरस्थे राघवेन्द्र-संस्कृतमहाविद्यालये अगस्त-मासस्य २५ दिनाङ्कतः ३१ दिनाङ्कपर्यन्तम् आयोज्यमानस्य संस्कृतसप्ताहस्य तृतीये दिवसे 'संस्कृतस्य महत्त्वम्' इति विषये प्रभावशालिनी परिचर्चा आयोजिता। कार्यक्रमेऽस्मिन् प्रधानाचार्यः डॉ. अनिलकुमार-ईश्वरः, महाविद्यालयस्य सहायकप्राध्यापकाः, बहुसङ्ख्याकाः छात्र-छात्राश्च उपस्थिताः आसन्। छात्राणां विचारमन्थनम्: परिचर्चायां विद्यार्थिभिः संस्कृतस्य प्राचीनता, वैज्ञानिकता, साहित्यिकसमृद्धिः, भारतीयज्ञानपरम्परायां तस्याः योगदानं च अधिकृत्य सोत्साहं स्वविचाराः प्रकटीकृताः। विद्यार्थिनां सक्रियसहभागितया कार्यक्रमः जीवन्तः सञ्जातः। वक्तृणां सन्देशः: वक्तृभिः स्पष्टीकृतं यत् संस्कृतं न केवलम् अतीतस्य भाषा, अपि तु भारतीयज्ञानस्य, संस्कृतेः, दर्शनस्य, चिन्तनस्य च समृद्धपरम्परायाः सशक्तवाहिका अस्ति। अस्याः संरक्षणस्य, संवर्धनस्य, प्रचारप्रसारस्य च दायित्वं नूतनपीढ्याः उपरि अपि अस्ति।छात्रैः गृहीतः सङ्कल्पः: परिचर्चाकाले विद्यार्थिभिः संस्कृतभाषां सुदृढां कर्तुम्, अस्याः अध्ययनं वर्धयितुं, प्रचारप्रसारार्थं च सर्वविधं प्रयासं कर्तुं सङ्कल्पः गृहीतः। कार्यक्रमस्य सञ्चालनं सहायकप्राध्यापकेन डॉ. श्रीमननारायणकुमारेण कृतम्। विद्यार्थिनाम् उत्साहपूर्णया सहभागितया संस्कृतसप्ताहस्य इदम् आयोजनं ज्ञानस्य, संवादस्य, सङ्कल्पस्य च प्रभावशाली मञ्चः अभवत्।

# संस्कृतं विस्मृत्य भारतः स्वकीयस्मृतेः एकमध्यायं विस्मरति- प्रमोदपण्डितः

हिमसंस्कृतवार्ताः- लखनऊ।

संस्कृतसप्ताहस्य अवसरे संस्कृतभारत्याः पूर्वी-उत्तरप्रदेशसङ्गठनमन्त्री प्रमोदपण्डितः संस्कृतस्य महत्त्वं भारतीयज्ञानपरम्परायां तस्याः भूमिकां च विषयीकरणं कृत्वा महत्त्वपूर्णान् विचारान् प्रस्तुतवान्। सः अवदत् यत् राष्ट्रस्य वास्तविकपरिचयः केवलं तस्य सीमाभिः न भवति, अपितु तस्य सामूहिकस्मृतौ, ज्ञानपरम्परायां जीवनदृष्टौ च सुरक्षितः भवति। भारतस्य सन्दर्भे अस्याः ज्ञानस्मृतेः विराटः अध्यायः संस्कृते निहितः अस्ति।

प्रमोदपण्डितः अवदत् यत् यस्यां भाषायां भारतीयमनीषिभिः ऋतः ब्रह्मपर्यन्तं, गणितात् खगोलपर्यन्तं तथा व्याकरणात् दर्शनपर्यन्तं स्वीयं चिन्तनं प्रकाशितम्, तां केवलं प्राचीनभाषाम् इति मत्वा परित्यक्तुं न उचितम्। संस्कृतदिवसः केवलं औपचारिककार्यक्रमेषु, श्लोकपाठेषु अथवा सप्ताहपर्यन्तं सांस्कृतिककार्यक्रमेषु च सीमितः न भवेत्, अपि तु भारतस्य बौद्धिकयात्रायाः पुनरवलोकनस्य अवसरः भवेत् इति तेन प्रतिपादितम्।

सः अवदत् यत् भारतीयजीवनदृष्टौ शिक्षा केवलं जीविकोपार्जनस्य साधनं नासीत्, अपितु आत्मबोधस्य, विवेकस्य, चरित्रनिर्माणस्य तथा जीवनस्य व्यापकप्रयोजनस्य बोधस्य च माध्यमम् आसीत्। उपनिषदां वचनम् "सा विद्या या विमुक्तये" अस्याः शिक्षादृष्टेः सारं प्रकाशयति।संस्कृतं केवलं आध्यात्मिकग्रन्थानां भाषा इति धारणा अपूर्णा इति कथयन् प्रमोदपण्डितः अवदत् यत् संस्कृतवाङ्मये वेदाः, उपनिषदः, दर्शनानि, व्याकरणम्, स्मृतयः, पुराणानि, काव्यानि च सन्ति। तदतिरिक्तं कृषिः, अर्थव्यवस्था, राज्यव्यवस्था, चिकित्सा, गणितम्, खगोलशास्त्रम्, धातुविज्ञानम्, रसायनम्, स्थापत्यम्, वनस्पतिविज्ञानम्, सङ्गीतम्, नाट्यम्, नृत्यम्, युद्धकला इत्यादीनां विविधक्षेत्राणां ज्ञानमपि संस्कृतवाङ्मये उपलब्धम् अस्ति। सः अवदत् यत् संस्कृतात् दूरी केवलं भाषायाः दूरी नास्ति, अपि तु तेषां मूलस्रोतसां दूरी अपि अस्ति, येभ्यः भारतीयसभ्यतया स्वकीयाः प्रश्नाः पृष्टाः तेषां समाधानानि च अन्विष्टानि। अनुवादेन ग्रन्थस्य सामान्यः आशयः ज्ञातुं शक्यते, किन्तु मूलभाषायां निहितां व्युत्पत्तिं, अर्थच्छटां, ध्वनिं तथा सन्दर्भगतां गहनतां मूलसंस्कृतपाठेन एव समीचीनतया ज्ञातुं शक्यते।

पाणिनीयव्याकरणपरम्परायाः उल्लेखं कुर्वन् सः अवदत् यत् भाषायाः सूक्ष्मं विश्लेषणं, अनुशासनं तथा वैज्ञानिकदृष्टिः भारतीयभाषिकमनीषायाः महत्त्वपूर्णा उपलब्धिः अस्ति। संस्कृतस्य अनेकाः शब्दाः केवलं भाषायाः अङ्गानि न सन्ति, अपितु भारतीयचिन्तनस्य विशिष्टानाम् अवधारणानां संवाहकाः सन्ति।

भारतीयभाषाणां परस्परसंबन्धस्य विषये अपि तेन संस्कृतस्य महत्त्वं प्रतिपादितम्। हिन्दी-सहितासु अनेकासु भारतीयभाषासु संस्कृतस्य शब्दसम्पदः गहनः प्रभावः दृश्यते। संस्कृतम् भारतीयभाषाणां मध्ये सांस्कृतिकं भाषिकं च सेतुरूपेण महत्त्वपूर्णां भूमिकां निर्वहति।आत्मनिर्भरभारतस्य सन्दर्भे प्रमोदपण्डितः अवदत् यत् आत्मनिर्भरता केवलम् अर्थव्यवस्थायाः विषयः न भवेत्। ज्ञाने पराश्रयः सन् पूर्णस्य आत्मनिर्भरत्वस्य कल्पना कठिनास्ति। आधुनिक- विज्ञानस्य, प्रौद्योगिक्याः अन्यभाषाणां च त्यागः न अपेक्षितः, अपि तु आधुनिकज्ञानं स्वीकुर्वता स्वकीयज्ञानस्रोतांसि न विस्मर्तव्यानि इति तेन स्पष्टं कृतम्।

सः संस्कृतस्य वर्तमानस्थितिं प्रति चिन्तां प्रकटयन् अवदत् यत् संस्कृतं विद्यालयानां शास्त्रीयसंस्थानां च सीमाभ्यः बहिः निष्कास्य परिवारैः, विश्वविद्यालयैः, सामाजिकसंस्थाभिः सामान्यजनैश्च सह सम्बद्धं करणीयम्। संस्कृतसप्ताहः केवलम् उत्सवपर्यन्तं सीमितः न भवेत्, अपि तु अध्ययनस्य जिज्ञासायाश्च स्थायीप्रवृत्तिं जनयेत्।

अन्ते प्रमोदपण्डितः अवदत्- "संस्कृतं पठितुं केवलं भाषां ज्ञातुं न, अपि तु शब्दस्य पृष्ठतः स्थितं चिन्तनं, शास्त्रस्य पृष्ठतः स्थिता मनीषां तथा भारतीयसभ्यतायाः जीवितां स्मृतिं च ज्ञातुम् अस्ति।" सः संस्कृतसप्ताहं भारतीयज्ञानपरम्परायाः आत्मस्मृतेः जागरणस्य पुनरुत्थानस्य च अवसरः कर्तुं समाजं प्रति आह्वानं कृतवान्।




## "संस्कृत कथा मञ्जरी"

**।।द्वात्रिंशत्पुत्तलिकासिंहासनम्। "अथ सर्वस्वदक्षिणायज्ञवर्णनं नाम तृतीयोपाख्यानम्" (२)**

ततो ब्राह्मणस्तानि रत्नानि गृहीत्वा उज्जयिनीं यावत् आगतः, तावत् यज्ञसमाप्तिर्जाता। राजा अवभृथस्नानं कृत्वा सर्वान् अर्थिजनान् परिपूर्णमनोरथान् अकरोत्। ब्राह्मणो राजानं दृष्ट्वा रत्नानि अर्पयित्वा, प्रत्येकं तेषां गुणमकथयत्। ततो राजा अवदत्- भो ब्राह्मण! भवान् यज्ञदक्षिणाकालं व्यतिक्रम्य समागतः, मया सर्वाऽपि ब्राह्मणसमूहो दक्षिणया तोषितः, तर्हि त्वम् एतेषां चतुर्णां मध्य यत् तुभ्यं रोचते तत् गृहाण। ब्राह्मणनोक्तं- गृहं गत्वा गृहिणीं, पुत्रं,स्नुषाश्च पृष्ट्वा सर्वेभ्यो यद्रोचते तत् ग्रहीष्यामि। राज्ञोक्तं- तथा कुरु। ब्राह्मणोऽपि स्वगृहमागत्य सर्व वृत्तान्तं तेषामग्रे अकथयत् तच्छ्रुत्वा पुत्रेणोक्तं- यद्रत्नचतुरङ्गबलं ददाति तत् ग्रहीष्यामः; यतः सुखेन राज्यं कर्त्तुम् अर्हिष्यामः। पित्रोक्तं- बुद्धिमता राज्यं न प्रार्थनीयम्। पुनः पिता वदति- यस्माद्धनं लभ्यते तत् गृहाण धनेन सर्व्वमपि लभ्यते। भार्य्ययोक्तं- यद्रत्नं षड्रसान् सूते, तत् गृह्यताम्। सर्वेषां प्राणिनामन्नेनैव प्राणधारणं भवति। स्नुषयोक्तं- यद्रत्नं रत्नाभरणादिकं सूते तत् ग्राह्यम्। एवं चतुर्णां परस्परं विवादो लग्नः, ततो ब्राह्मणो राजसमीपमागत्य चतुर्णां विवादवृत्तान्तमकथयत्। राजाऽपि तच्छ्रुत्वा तस्मै ब्राह्मणाय चत्वार्य्यपि रत्नानि ददौ। इति कथां कथयित्वा पुत्तलिका राजानमवदत्- भो राजन्! औदार्य्यं नाम सहजो गुणः न तु औपाधिकः। उक्तञ्च-
"चम्पकेषु यथा गन्धः कान्तिर्मुक्ताफलेषु च।
यथेक्षुदण्डे माधुर्य्यम् औदार्य्यं सहज तथा।।"
त्वयि एवंविधमौदार्य्यं विद्यते चेत् तर्हि अस्मिन् सिंहासने समुपविश। तच्छ्रुत्वा राजा तूष्णीमासीत्।

**डा.वर्षा प्रकाश टोणगांवकर, पुणे, महाराष्ट्रम्**

# "रक्षाबन्धनम्"

## भारतीयाः उत्सवप्रियाः

अस्माकं देशे भारतवर्षे चत्वारि मुख्यानि पर्वाणि सन्ति। तेषां नामानि एतानि सन्ति-
{१} रक्षाबन्धनं {२} विजयदशमी {३} दीपावली {४} होलिकोत्सवश्च।
एतानि पर्वाणिक्रमशः- ब्राह्मणानां, क्षत्रियाणां, वैश्यानां, शूद्राणां च भवन्ति। इदं रक्षाबन्धनं पर्व ब्राह्मणानां मुख्यं पर्व अस्ति। अस्मिन् पर्वणि सर्वे ब्राह्मणाः वेदविहितं कर्म कुर्वन्ति। वेदमन्त्रैरिष्टदेवोपासनां ते कुर्वन्ति। अद्य दिने धीवराः सागरं नारिकेलैः पूजयन्ति। तेषाङ्कृते श्रावणपौर्णिमा 'नारिकेलपौर्णिमा' इति कथ्यते। एतस्मिन् एव दिवसे संस्कृतदिनोत्सवः भवति। एषः अपि रक्षाबन्धनदिनस्य अपरः विशेषः। रक्षाबन्धनम् पुरा राजकुलेषु एव प्रचलितम्। एतस्य महत्त्वं पौराणिककथासु ऐतिहासिककथासु च प्रसिद्धम्। एतस्मिन् दिवसे भगिनी बन्धोः करे कङ्कणं बध्नाति। तम् एवं वदतीव माम् इव सर्वाः भगिनीः रक्ष सर्वसंकटेभ्यः। स्वसमाजस्य राष्ट्रस्य अभ्युदयाय सिद्धः भव। प्राचीन काले राजपूतराज्ञी पद्मिनी हुमायुं नाम नृपाय रक्षाबन्धनम् प्रेषितवती। ब्राह्मणः पुरोहिताश्च राजगृहं गत्वा राजानं रक्षाकङ्कणम् अबध्नन्। एतद् रक्षासूत्रं मांगलस्य, भगिनी प्रेम्णः च प्रतीकम्। साम्प्रतं रक्षाबन्धनं पारस्परिकस्नेहस्य सामाजिक संघटनस्य च मूलकारणम् अस्ति।
रक्षाबन्धनविषये उक्तं च केनचिद् विदुषा-
"येन बद्धो बली राजा दानवेन्द्रो महाबलः।
तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल।।"

**डा.वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम् ®©**

## संस्कृतस्य शब्देषु निहिता अस्ति राष्ट्रजागरणस्य आग्नेयी शक्तिः प्रो. जयशङ्करझाः

## संस्कृतदिवसस्य पूर्वसन्ध्यायाम् आशुभाषणप्रतियोगिता, प्रतिभागिभिः प्रदर्शिता प्रतिभा




**दरभंगा। राघव नाथ झा, हिमसंस्कृतवार्ता।**
डॉ.सङ्गीता-सुदर्शन-अग्रवाल-न्यासेन संस्कृत-दिवसस्य पूर्वसन्ध्यायाम् आशुभाषणप्रतियोगिता आयोजिता। कार्यक्रमस्य अध्यक्षतां कुर्वन् लोकभाषाप्रचारसमित्याः राष्ट्रियोपाध्यक्षः प्रो. जयशङ्करझाः अवदत् यत् चरित्रनिर्माणात् आरभ्य राष्ट्रनिर्माणपर्यन्तं संस्कृतस्य महती भूमिका वर्तते। संस्कृतस्य शब्देषु आग्नेयी शक्तिः निहिता अस्ति। 'वन्दे मातरम्' इत्यनयोः केवलं द्वयोः पदयोः देशे या राष्ट्रीयचेतना सञ्चारिता, सा अस्य प्रत्यक्षं प्रमाणम्। सः दक्षिणभारतस्य प्रसिद्धस्य संस्कृतग्रामस्य 'मत्तूर' (मुत्तूर) इत्यस्य स्वयात्रायाः अनुभवान् संविभज्य अकथयत् यत् तत्र कृषकाः श्रमिकाश्च अपि संस्कृतेन सहजं सम्भाषणं कुर्वन्ति। तथैव 'शुभम्' संस्थानेऽपि संस्कृतं दैनिकव्यवहारस्य भाषां विधातुं प्रयासः करणीयः। प्रतियोगितायाः निर्णायकः प्रो. श्रीप्रकाशपाण्डेयः प्रतिभागिनः सम्भाषणकलायाः सूक्ष्मांशैः परिचायितवान्। एम.पी. सिंह साइन्स कॉलेज इत्यस्य प्रधानाचार्यः डॉ. राजीवकुमारः एतादृशस्य आयोजनस्य कृते शुभम्-संस्थायाः संस्थापिकायाः डॉ. सङ्गीता-अग्रवाल-महोदयायाः भूरिशः प्रशंसां कृतवान्। कार्यक्रमस्य विषयप्रवेशं सत्येन्द्रकुमारमिश्रः अकारयत्। सञ्चालनं कुर्वन् बी.आर. अम्बेडकर-संस्कृत-स्नातकोत्तर-महाविद्यालयस्य डॉ. मनीषकुमारझाः यूनां संस्कृतं प्रति उन्मुखीकरणस्य आवश्यकतां प्रतिपादितवान्।
धन्यवादज्ञापनं कुर्वती डीएसएसए-न्यासस्य प्रबन्ध-न्यासिनी डॉ. सङ्गीता-अग्रवाल-महोदया न्यासस्य आगामि-कार्यक्रमाणां रूपरेखां प्रास्तौत्। सा विश्वासं प्राकटयत् यत् अचिरादेव अस्मिन् संस्थाने संस्कृतं दैनन्दिनव्यवहारस्य भाषा भविष्यति।
**स्पर्धायाः परिणामाः** कनीयवर्गस्य आशुभाषणस्पर्धा: सृष्टिः प्रथमं, गुडिया द्वितीयं, तान्या च तृतीयं स्थानम् अलभत। वरीयवर्गस्य आशुभाषणस्पर्धा: सबिता कुमारी प्रथमं, उज्ज्वलकुमारः द्वितीयं, कर्मप्रकाशतिवारी च तृतीयं स्थानं प्राप्तवन्तः। अस्मिन् अवसरे अमरजीतसिंहः, गौरीशङ्करझाः, उज्ज्वलकुमारः, आलोककुमार ओझा इत्यादयः सक्रियाः आसन्। सफलप्रतिभागिनः संस्थायाः पक्षतः प्रशस्तिपत्रेण, धनपुरस्कारेण, स्यूतेन (बैग) च सम्मानिताः अभवन्।



## नौबतपुर-राघवेन्द्र-संस्कृतमहाविद्यालये 'संस्कृतस्य महत्त्वम्' इति विषये परिचर्चा, विद्यार्थिभिः गृहीतः भाषासंवर्धनस्य सङ्कल्पः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अद्य मया विचित्राः वार्ताः श्रुताः। **नन्दिनी-** प्रथमा वार्ता का अस्ति?
**काव्या-** मध्यप्रदेशे चिकित्सालये एका घटना दृष्टा। एकया महिलया स्वस्यूतः स्थापितः। तस्मिन् स्यूते सुवर्ण-आभूषणानि स्थापितानि अभूवन्। तत्र एकः श्वा आगतः। तेन शुना स्यूतः नीतः। आरक्षकैः चलच्चित्रम् (CCTV) दृष्टम्। तदा सत्यम् ज्ञातम्।
**नन्दिनी-** अहो! शुना अपि चौर्यं कृतम्! अन्या वार्ता का? **काव्या-** बेङ्गलूरु-विमानस्थानके एका अन्या घटना दृष्टा। एकेन यात्रिणा स्वस्य मुखे सुवर्णं स्थापितम्। आरक्षकैः सः नरः गृहीतः। तस्य मुखे एव सुवर्ण- गुलिकाः प्राप्ताः।
**नन्दिनी-** मुखे सुवर्णं स्थापितम्! महदाश्चर्यम्! अन्यत् किं जातम्? **काव्या-** ताइपेनगरे धूम्रपानकर्तृभ्यः एकं लौहपञ्जरं निर्मितम्। तत् पञ्जरं श्व-पञ्जरम् इव दृष्टम्। जनैः तस्य निन्दा कृता। अतः अधिकारिभिः तत् पञ्जरं शीघ्रम् निष्कासितम्।
**नन्दिनी-** धूम्रपान-कर्तृभ्यः पञ्जरम्! हास्यकरम् एव। अन्तिमा वार्ता का? **काव्या-** मध्यप्रदेशे एकः मन्त्री प्रावोचत्- शर्करायाः मूल्यवृद्धिः उत्तमा। अति-चत्वारिंशद्- वर्षीयैः जनैः शर्करा न खादितव्या। बालकेभ्यः एव न्यूनेन मूल्येन शर्करा दातव्या।
**नन्दिनी-** अद्भुतम्! मूल्यवृद्धेः अपि समाधानं कृतम् तेन। अस्तु, अद्यतनवार्ताः अत्रैव समाप्ताः।

**हिमसंस्कृतवार्ताः, ईदरधीररजः**